कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

①

श्रीगणेशाय नमः ॥ ॥ सरस्वत्यै नमः ॥ ॥ वेदांतविज्ञानसुनिश्चितार्थैर्योगीश्व-
रैर्ध्येयमनंतं विशुद्धं ॥ क्षमानुमाभ्यामधिगम्यमानं वंदे महेशं सदनुग्रहेशं ॥ विद्व-
न्नाथं नमस्कृत्य माधवाख्यसरस्वती ॥ शिवादित्यकृतेष्टीकां करोति मितभाषि-
णीं ॥ शिष्टशिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं कर्त्तव्यविघ्नविघात-
कं परमेश्वरनमस्कारलक्षणं मंगलमाचरन्नर्थाद्विषयप्रयोजने दर्शय-
ति ॥ हेतवइति ॥ ॥ ननु ॥ नमस्कारादिमंगलाचरणं फलप्रमाणयोरभावा- ॥१॥
त् ॥ अयुक्तमितिचेन्न ॥ फलं तावत्कर्त्तव्यविषयविघ्नध्वंस एव बा- ॥१॥
रीवर्च्चीति न त्वभीष्टसमाप्तिः ॥ तत्र मंगलस्यान्वयव्यतिरेकाभ्यां व्यभिचा-
रात् ॥ कृतेपि मंगले कादंबर्यादौ समाप्त्यभावाद्कृतेपि मंगले प्रमत्तनास्ति-
कानुष्ठितकर्मसमाप्तेर्विद्यमानत्वात् ॥ विघ्नध्वंसे तु नैवं ॥ यावन्मंगलं ताव-

श्रुयार

द्विघ्नध्वंसांगीकारात् ॥ विघ्नध्वंसकामानां तादृशाचारानुमितश्रुत्या वि-
घ्नध्वंसे कामो मंगलमाचरेत् ॥ इत्येवंरूपयोर्विघ्नध्वंसमंगलयोः कार्यकारण-
भावावबोधनेनाव्यभिचारात् ॥ समाप्तिस्तु प्रतिबंधकदुरितध्वंससहकृतबले-
कावगतस्वकारणादेव भवति ॥ यथा कारीरीयागेनावग्रहध्वंसे वृष्टिः स्वका-
द्भवति तद्वत् ॥ क्वचित्तु समाप्त्यभावो विघ्नभूयस्त्वादंतरोत्पन्नविघ्नांतराद्वे-
ति ॥ नास्तिकानुष्ठितसमाप्तिस्तु जन्मांतरादनुवर्त्तमानविघ्नाभावादिति
२ द्रष्टव्यं ॥ प्रमाणं तु ॥ नमस्कारो वेदबोधितकर्त्तव्यताकः अलौकिकाविगीतशि-
ष्टाचारविषयत्वात् ॥ दर्शादिवत् ॥ अस्यार्थः ॥ वेदेन बोधिता कर्त्तव्यता यस्य
स तथा ॥ शेषाद्विभाषेति कप्रत्ययः ॥ निर्विघ्नसमाप्तिकामो नमस्कारमाच-
रेदित्याचारानुमितवेदेन कर्त्तव्यता बोध्यत इति साध्यार्थः ॥ नन्वेवं स

Acc. No. 301

शीर्षक - सप्तपदार्थी टीका.

~~लेखक~~ - (मितभाषिणी)

काल -

विषय - न्याय.

लेखक - माधव यतीन्द्र

पत्र ([illegible] .64)

KKSU LIBRARY
RAMTEK
441 106
M-894
Dist Nagpur

Checked 2012

माप्तेरेव काम्यत्वान्मंगळफळत्वापत्तिरिति चेन्न ॥ नागृहीतविशेषणा वि-
शेष्ये बुद्धिरिति न्यायेन निर्विघ्नपदवाच्यविघ्नाभावस्यैव फळत्वात् ॥ हे-
तौ तु ॥ आचारविषयत्वादित्युक्ते चैत्यवंदनादौ व्यभिचारः स्यात् ॥ चैत्यं ना-
म बौद्धानां देवस्थानं ॥ तस्यापि बौद्धाचारविषयत्वं वरिवर्त्तीति ॥ ननु वेद-
बोधितकर्त्तव्यताकत्वमतो विशिनष्टि शिष्टेति ॥ वेदप्रामाण्याभ्युपगंतारः
शिष्टाः ॥ तदाचारविषयत्वं चैत्यवंदनादौ नास्तीति न व्यभिचारः ॥ एवं विश्वा-
मित्रादीनां शिष्टानां क्काचयाज्ययाजनाचारे व्यभिचारः स्यात् ॥ तस्य शिष्टाचा-
रविषयत्वेपि वेदबोधितकर्त्तव्यकत्वाभावात् ॥ अत उक्तंऽविगीतेति ॥ अविगी-
ता धर्मशास्त्राविरुद्धः शिष्टाचनामाचार इत्यर्थः ॥ विश्वामित्रादीनामया-
ज्ययंजनचारे तु विगीतमिति न व्यभिचारः ॥ अवगीतत्वमुक्तं शिष्टानां भो

जनादौ तदाचारविषये व्यभिचारः स्यात्॥ भोजनादे रागतः प्राप्तत्वेन वेदबो
धितकर्त्तव्यकत्वाभावात्॥ अतनुक्तं अलौकिकेति॥ अलौकिकत्वं अहिके
गोचरप्रमाणाविषयत्वं भोजनं तु प्रत्यक्षसिद्धमिति न तत्र व्यभिचारः। अ
लौकिकश्चासौ अवगीतश्चासौ शिष्टाचारश्चेति समासः। आचारः प्रयुक्तेः॥
तद्विषयत्वादिति हेत्वर्थः। दर्शादिः विशिष्टशिष्टाचारविषयो भवति दर्शपूर्णमा
साभ्यां स्वर्गकामो यजेतेत्यादिवेदबोधितकर्त्तव्यताको भवति तद्वन्नमस्का
रोपि व्याप्तिपक्षधर्मताविशिष्टहेतुमत्वात्॥ वेदबोधितकर्त्तव्यताक इति
प्रमाणार्थः॥ अतः प्रमाणफलयोः सत्त्वान्मंगलाचारणं युक्तमेवेति मत्वा त
दाचरन् ग्रंथकारः॥ हेतवदति॥ शांभवे नम इत्यन्वयः नमस्वस्तीत्यादिना
चतुर्थी॥ शंसुखं भवत्यस्मादिति व्युत्पत्त्या स्वकृद्वंदनादेर्नमस्कारः स्व

मितभा

३

षिणि

तःस्यान्नेश्वरस्य। अत उक्तं गुरव इति। हिताहितप्राप्तिपरिहारोपदेष्टा गुरुः।
तस्मै नम इ[illegible]त्यर्थः। स्वगादेरचेतनत्वेन गुरुत्वाभावा[illegible]तस्य नमस्कारः॥ न २
गुरुत्वे हेतुमाह॥ विद्यानां प्रभव इति। विद्याशब्दो विद ज्ञान इत्यस्मात्संज्ञा
यां समजनिषदनिपतमनविदषुञ्शीङ्भृञिइणइति सूत्रेण क्यप्प्रत्यया
न्तो ज्ञान[illegible]वचनः। तेन तदुत्पादकानि विद्यास्थानानि लक्ष्यंते॥ तानि तु पु
राणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्म
॥२॥ स्य च चतुर्दश॥ आयुर्वेदो धनुर्वेदो गाधर्वश्चा[illegible]स्त्रकमीतिस्मृत्युक्ता
नि॥ विद्यास्थानानां प्रभुत्वं स्वातंत्र्येण तद्वक्तृत्वं विद्यानां च वक्तृत्वाद्गुरु
त्वमित्यर्थः॥ विद्यानां प्रभवे गुरवे शंभवे नम इत्युक्तेपि न वि[illegible]ह्नितेश्व वि॥
रस्य नमस्कारसिद्धिः॥ योगिनां मुनीनां चकतिपय विद्यास्थानां च[illegible] त्रे

ध्यै

गुरुत्वं शंभुत्वं च संभवति यतः । अत उक्तं सर्वेति । सर्वविद्यास्थानानां प्र-
वं वेनेक्तृत्वमात्रं किंतु स्वतंत्रवक्तृत्वं स्वतंत्रवक्तृत्वं नाम स्वतः प्रज्ञयोपलब्धवक्तृत्वं । मु-
नीनां तु गुरूपूर्वकत्वेन न स्वतंत्रवक्तृत्वमिति परमेश्वरस्यैवायं नमस्कारो नान्यस्ये-
ति सिद्धं । एतच्च सर्वं शास्त्रव्युत्पन्नानामेवेति पक्षमाश्रित्य व्याख्यायि विप्रसंभ्यो ड्व-
संज्ञायामिति सूत्रेण मितद्र्वादिभ्यः इति वार्त्तिकेन मितंद्रुः शंभुरित्यादिरूपसिद्धेर्थे
असंज्ञायां डुप्रत्ययविधानाच्च शंभुशब्दो यौगिको व्याख्यातः ॥ अथ पुराणादिप्र-
सिद्धिबलाच्छंभुशब्दः परमेश्वरे रूढ इति पक्षमाश्रित्यैवमेवोत्तरार्द्धं व्याख्यायते ॥
शंभवे परमेश्वराय नम इत्यन्वयः । विद्यारंभे परमेश्वर एव नमस्कार्यः ईशानः स-
र्वविद्यानामिति श्रुत्या समस्तविद्यानां प्रभुत्वस्योक्तत्वादिति सूचयन्नुक्तं तस्य ल-
क्षणमाह ॥ प्रभवे सर्वविद्यानामिति ॥ सर्वविद्यानां प्रभुत्वं तत्स्वाम्यं ॥ स्वतंत्रप्र-
णेतृत्वमिति यावत् ॥ तच्च परमेश्वरलक्षणं कतिपयविद्यावक्तृत्वव्यावृत्त्यर्थं स-

ति२ न१

र्वेति॥ योगिव्यापारस्यार्थे स्वातंत्र्यं द्रष्टव्यं। गुरवे शंभवे नम इति सामानाधिकपर्ये गुरुदेव
तयोरैक्येन चिंतनं विघ्नाघातस्यांतरंगमिति तदारंभे कार्यमिसूचयांबभूव॥ ननुल
क्षणं व्यावृत्तिं व्यवहारं वा जनयति न तु तद्वस्तु साधयति॥ अतः परमेश्वरस्सा
धनाय प्रमाणं वाच्यमत आह हेतव इति॥ गंम्यते इति अंगतिनसुति विनाशधर्म्म ञ३
काणि कार्याणि तेषां हेतवे निमित्तकारणायेत्यर्थः। [illegible]यमानं कार्यं कर्त्तारं विना आ५
नं संभवतीति तमाक्षिपति॥ स एव परमेश्वर इति प्रमाणं सूचितं॥ प्रयोगस्तु॥ स
४॥ र्वं कार्यं सहेतुकं कादाचित्कत्वात् यत्र सहेतुकं न भवति तत्कादाचित्कमपि न भ ॥४
दा वति यथा गगनं न तथा चेदं कौचित्कं न भवति तस्मात्सहेतुकं न भवतीति ने
ति व्यतिरेकी॥ हेतुशब्देनात्र कर्त्ता विवक्षीते। अतोऽदृष्टादिभिर्न सिद्धसाध
नं॥ ननु केवलव्यतिरेकी न प्रमाणं। व्याप्तिपक्षधर्मताविशिष्टलिंगाभावा
त्। तथाहि यो यो धूमवान् स सोऽग्निमान् इति महानसादौ व्याप्तस्य धूम

मस्य पक्षे वह्निव्याप्यधूमवानयमिति ज्ञानस्यानुमितिजनकत्वं दृष्टं। केवल
तिरेकीणि तु सहेतुकत्वाभावकादाचित्कत्वाभावयोर्व्याप्तिः। कादाचित्कस्य
पक्षधर्मता॥ अतो व्याप्तिपक्षधर्मताविशिष्टलिंगस्य नास्तीति तत्कथं तद्गम
कं। अथ व्यतिरेकव्याप्तिमतयाऽन्वयव्यतिरेकिवत्केवलव्यतिरेकिणोऽप्यन्व
यव्याप्तिरनुमीयत इति मन्यसे॥ तर्हि तत्प्रदर्शनेन विना व्यतिरेकप्रदर्शना
व दप्राप्तकालता॥ अवयवे विपर्यासवचनमप्राप्तकालमिति सूत्रे अवयवग्राहस्यो
पलक्षणतया तदन्यविपर्यासस्यापि तथात्वादिति॥ अतो न व्यतिरेकी प्रमाणमि
तिचेत्॥ मैवं मंस्थाः। केवलव्यतिरेकिण्यपि निरूपाधिकव्यतिरेकसहचारे
णान्वयव्याप्तिमनुमाय तद्विशिष्टस्य हेतोर्गमकतांगीकारात्॥ ननु [illegible] वाच्यं नि
रूपाधिकसहचारव्याप्त्योरेकत्वात्कथं तेन तदनुमानमुक्तं॥ आत्माश्रयदोषप
त्तेरिति तयोर्भेदात्। तथाहि॥ उभयोः समानाधिकरण्यं सहचारः। साधनसमा

व्यतिरेकिसंज्ञात्वस्य व्यतिरेकसहचारादेव॥५

मितभा

नाधिकरणात्यंताभावाप्रतियोगिसाध्यकत्वं हेतोर्व्याप्तिरिति॥ अतो नोक्तदोषा
पत्तिः। नाप्राप्तकालता। अन्वयव्याप्तेरेव प्रथमं दर्शनात्॥ अतो न व्यतिरेकस्य प्र
माणं॥ नन्वभावयोः सहचारेण अन्वयव्याप्त्यनुमानेऽतिप्रसंगः। वह्न्यभावधूमा
भावसहचारेण घटपटयोरपि व्याप्तिप्रसंगादिति चेत्॥ मैवं॥ ययोरभावयोः
सहचारस्तत्प्रतियोगिनोरेव व्याप्तिरिति प्रतियोग्यनुयोगिभावस्य नियामक
त्वात्॥ ननु घटादौ हेतुसाध्ययोः सत्वादन्वयव्यतिरेक्येवायं न केवलव्य
॥५॥ व्यतिरेकी॥ अथ सर्वस्य पक्षीकृतत्वे न पक्षातिरिक्तसपक्षाभावात्॥ नान्व
य व्यतिरेकित्वमिति मनुषे॥ तदपि न निश्चितसाध्यवतो हि सपक्षत्वं॥ न तु प
क्षातिरिक्तत्वे सतीत्यपि गौरवेण वैयर्थ्यात्॥ तथा च किरणावलीकारः। पक्षि
पूर्वपक्षे त्वे प्रकरणे आह स्म॥ समस्तपक्षिव्याइतरेभेदो साध्ये घटएव दृष्टांतो
२ ऽस्ति किं व्यतिरेकिणाति। अतोऽन्वयव्यतिरेकित्वमेवास्य इति चेत्॥ सत्यमा

षिणि

॥८

5

हभवान्। तथापि अन्वयव्याप्तिवद्व्यतिरेकव्याप्तेरपि गमकत्वा[illegible]वधारणा
दन्वयव्याप्त्यप्रतिसंधाने व्यतिरेकप्रयोगसंभवात्॥ यद्वा॥ पक्षेतिरिक्तएवस
पक्ष इति मतमाश्रित्यायं प्रयोगो द्रष्टव्यः बहुवादिसंमतत्वात्॥ प्रमाणवतो गौर
वस्यापि न्याय्यत्वादिति॥ अंतरवाहस्माचार्यस्तत्रैव सिद्धांते॥ आस्तांतवस्तु हेतु
पदेशो व्यतिरेक्यनुमानं तु निर्युढमिति॥ अथवा सहेतुकमिति साध्यस्थाने स
र्वविधेतुकमिति कर्त्तव्यं॥ तथा च॥ नाच्यपि वक्त्रां का। ननु अत्र सर्वविध्येतुक
त्वस्याप्रसिद्ध्या [illegible] ऽप्रसिद्धविशेषणः
ष४ पक्षः को दोष इति चेत्॥ अयं दोषः व्यतिरेकिणि साध्याप्रसिद्धौ तन्निरूपणाधीनसाध्या नि-
भावसाधनाभा[illegible]यौर्न व्याप्तिर्निरूप्यते॥ साध्यसामान्यज्ञानाभावे च पक्षे साध्यसं ण
देहानुपपत्तौ संदिग्धसाध्यवतः पक्षस्याभावापत्तिः॥ तथा च साध्यलक्षणविशेषणा
ज्ञानाभावात्॥ साध्यविशेषणपापक्षविशेष्यकानुमित्यनुपपत्तिः। विशेषणज्ञानकर

व३

मितभा

षि

6

णाभावात्॥ तथा चाप्रसिधविशेषणत्वे दोषत्रयं॥ व्याप्यनिरूपणत्वाद्व्यापात्वासिंधः॥
पक्षानिरूपणादाश्रसिंयोधः। अनुमित्यनुदयाद्बाधश्चेति। तस्मात्सर्वविधेतुकस्य
प्रसिधिर्वाच्येति चेत्॥ सत्यं॥ अस्य चापि सामान्यतः प्रसिधिः॥ तथाहि॥ किंचिद्ध
हेतुकत्वं अहेतुकव्यतिरिक्तनिष्ठात्यंताभावप्रतियोगिव्यतिरेकिधर्मत्वात्॥ पद
त्वादिवत् प्रमेयत्वादौ व्यभिचारवारणाय व्यतिरेकीत्युक्तं॥ आकाशादिनिष्ठात्यंता
भावप्रतियोगितयासिधसाधनतावारणायाहेतुकव्यतिरिक्तनिष्ठात्यंताभाव ॥
॥६॥ विशेषणं॥ तथा च॥ यतः किंचिद्धहेतुक[illegible]श्चैव्यविर्त्तते तदेव सर्वविधेतुकं प्रसिधं॥
तद्वस्तुगत्या पक्ष एव॥ तत्र केवलव्यतिरेकिणा तद्विशेषतः साध्यत इति नाप्रसि
द्धविशेषणः पक्षः॥ तस्माज्जगतो हेतव इति अनेन ईश्वरसाधके व्यतिरेक्यनु
म२ मानं सूचि॥ यद्वा॥ अनेन अन्वयव्यतिरेक्यनुमानमेवासूचयत्॥ तथाहि॥ गिरिद
रीवि[illegible]वर्तिनोंकुराः सकर्तृकाः कार्यत्वात् घटवत्॥ न चायं सदिग्धानैकांति

व२१

मताप

कः व्हित्यादौ संदिग्धसाध्यवति हेतोः सत्वात्॥ नत्वनिश्चितसाध्याभाववति हे
तुसंदेहे संदिग्धानैकांतिकता [redacted] ॥ अत्रत्वसाध्यस्यैव
संदेहो न हेतोरिति वाच्यं। हेतुः साध्याभाववद्गामी न वेति संदेहे संदिग्धानैका
तिकता। सच्च संदेहः साध्याभाववति हेतुसंदेहाधेतुमति वा साध्यसंदेहात्।
तदत्र व्हित्यादौ कार्यत्वहेतौ निश्चयेपि साध्यसंदेहाधेतोः साध्याभाववद्गामी
न्य५ त्वसंदेहोस्त्येव। किंचेदं सकर्तृकत्वं क[illegible] सहवर्त्तमानत्वं वा कर्तृजन्यत्वं वा॥
ता५ [illegible]मे यथापि सिधसाधन[illegible]। तथाहि॥ जीवानां विभुत्वेनांकुराणां तैः सहव
र्त्तमानत्वात्॥ भोजकादृष्टजन्यत्वेन जीवजन्यत्वाच्च सिधसाधनं॥ अथोपा
दानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वं सकर्तृकत्वं॥ उपादानं सम
वायिकारणं तद्गोचरो विषयो यासामपरोक्षज्ञानचिकीर्षाकृतीनां तास्तथा॥ इ
दमस्योपादानमिति लिंगाद्यजन्यं ज्ञानमपरोक्षं॥ इदं करिष्यामीति कर्तुमिच्छा
चौ६

सि१ अ६

विकिर्षा[illegible]त्तिः प्रयत्नः। एतायस्या सोतद्वान्॥ तेन अन्यत्वमिति विवक्षितं। एतच्चनास्म
दादीनां संभवतीति न सिद्धसाद्धनमिति चेत्॥ मैवं॥ सिद्धसाद्धनत्वादेव। अस्मदाद्युप
रोक्षज्ञानादेरपि जन्यदृष्टद्वारांकुराद्युपादानगोचरत्वात्॥ तथाहि॥ दृष्टसाद्धन[illegible]ज्ञानेस्य ता
परोक्षत्वेपि यागादिसाधनद्रव्यादौ प्रवृत्तिविषयेऽपरोक्षज्ञानमस्त्येव जन्यतस्तत्र चिकि
र्षाप्रयत्नौ॥ ततो यागादिनाऽदृष्टं यायते। तेन च भोजकादृष्टेन तत्तदुपा[illegible]दानस
हितेनांकुरादि जन्यते। [illegible]तोऽस्मदादिनैव सिद्धसाद्धनमिति दुष्टमिदमनुमानमिति
॥७॥ चेत्॥ मैवं वादीः॥ न तावत्संदिग्धानैकांतिकः साध्यसंदेहवति निश्चितस्य हेतोस्त
थात्वाभावात्। अन्यथा सर्वेषां हेतूनां पक्षे संदिग्धसाध्यवति वृत्तेर्दुष्टत्वप्रसंगा ॥७
त्। तथाच॥ सक[illegible]नुमानोच्छेदप्रसंगः। अतएव सिद्धांतप्रवादोपि नहि पक्षे
पक्षतुल्ये वा व्यभिचार इति॥ अपि च। पक्षपक्षेसमव्यतिरिक्तघटादौ कार्यत्वस्य
हेतोः सकर्तृकत्वेन व्याप्त्यवधारणात्॥ क्षित्यादौ पक्षे समे[illegible]कुरे पक्षे च वर्त्तमानः।
सममेवोभयत्र साध्यं साधयति निश्चितव्याप्तेर्हेतोः। संदिग्धसाध्यवति वर्त्तमा

आ४ सहेतु२ अ२

ई

नस्यसाध्यासाधकत्वनियमात्। सकर्तृकत्वे सेदं विवक्षिते ॥ अदृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वमिति ॥ अदृष्टं धर्माधर्मौ द्वारव्यापारो न विद्यते यस्यां ता अदृष्टाद्वारकाः ॥ ताश्च ता उपादानगोचरापरोक्षज्ञानचिकीर्षा ॥ कृतयश्च तद्वत्ताजन्यत्वं सकर्तृकत्वमित्यर्थः । तथा च ॥ नास्मदादिना सिद्धसाधनं ॥ अस्म[illegible]नचिकीर्षाकृतिनां अदृष्टाद्वारकं विनाङ्कुरोपादानगोचरत्वाभावेन अदृष्टाद्वारकत्वाभावात् ॥ सोङ्कुज्ञानमदृष्टद्वाराहेतुः ॥ कर्तृज्ञानं चिकीर्षाकृति [illegible]चेष्टादिद्वारा ॥ तथा [illegible]त्र अदृष्टाद्वारकविशेषणे नभोङ्कुजन्यत्वे निवारिते कर्तृजन्यत्वेन पर्यवसानादीश्वरजन्यत्वेनैव सिध्यति ॥ अतो न कश्चिद्दोष इति सिद्धं ॥ ननु तथापि ध्वंसस्य कार्यत्वेपि उपादानकारणाभावेन तद्गोचरज्ञानादिमतोऽभावात्तज्जन्यत्वं नास्तीति । हेतुरनैकान्तिक इति चेत् ॥ मैवं ॥ प्रागभावप्रतियोगित्वे सति समवेतत्वादिति विवक्षितत्वात् ॥ तदयं संक्षेपः । अङ्कुरः अदृष्टाद्वारकोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यः प्रागभावप्रतियोगित्वे सति समवे

गिरिदरिविवरवर्तिनो २

वीर

मिवभा

षि 8

तत्वात्। यदुक्तं साधनं तदुक्तं साध्यं। यथा पट इत्युपरम्यते विस्तरात्। जगतामेवेति॥
एवकारः कार्त्स्न्यवा ।अव्ययानामनेकार्थत्वात्॥ तथा चायमर्थः। समस्तकार्यहेतुः पर्य्यवसा
नोत्स परमेश्वरः। ननु कुळाळादिवत्कतिपयकार्यस्येति॥ बहुवचनस्य कपिंजलाधि
करणन्यायेन त्रित्वेनापि संभावात्॥ अथवा एवकारो भिन्नक्रमः। हेतव एवेति। त
त्र चायोगव्यवच्छेदार्थः। जगतां हेतुत्वं इश्वरस्य सर्वदा वर्त्तते॥ ननु कदाचिन्ना
स्तीति। एवं च क्षणिकः सर्वज्ञो जगद्धेतुः॥ कपिळादिवेदादिहेतुर्हिरण्यगर्भ एव स्व
॥८॥ तंत्रो जगधेतुः। प्रधानं जगधेतुरित्यादिमतानि निराकरिषत्॥ यद्वा हेतव एव नि द।
मित्तकारणाये व॥ न तु वेदांतिवदुपादानकारणत्वमपीसूचित॥ उपादानत्वेका
र्यस्यापि सचेतनत्वप्रसंगादिति। संसारा[illegible]तिहेतुत्वेनापि परमेश्वरः सिध्यतीति
प्रमाणांतरं तच्छादुर्व्यस्सूचना[illegible]ह॥ संसारार्णवसेतव इति॥ संसार एक[illegible] वि
ओ६ ज्ञातिदुःखसंबंधः स एवार्णवो दुस्तरत्वात्॥ अनादित्वेनागाधित्वात्॥ तस्य से
२ तवे विधारकाया। यथा सेतुर्ज्जळादेराधारः॥ तथा संसारिणां जगतामाधारः स्थि

स्थि०

त्तिहेतुरित्यर्थः। एष सेतुर्विधारएषां लोकानामसंभेदायेति श्रुतेः। सेतुशब्देन से
तुगतविधारकत्वं लक्ष्यते॥ प्रयोग स्तु॥ जगतां धृति साक्षात्परंपरया वाजयत्व साध्या
धृतित्वात्॥ गगनतलवर्त्तिस्वर्गशरीरं तद्वदनगतमांसधृतिवदिति॥ यद्वा एतच्छास्त्र
प्रतिपाद्यमोक्षकारणत्वेनेश्वरं दर्शयन्मोक्षप्रयोजन शास्त्रस्य दर्शयति॥ सं
सारेति॥ संसारार्णवस्य दुःख समुद्रस्य सेतुः पार प्रापकः॥ यथा सेतुः पारावार
वर्त्ती पारं प्रापयति। तथायमीश्वरोपि संसारपारस्य मोक्ष प्रापक इत्यर्थः॥ एवंम
नो वाक्कायकर्मभिः क्रियमाणं त्रिविधप्रहीतावल्लक्षणं मंगलाचरणं शिष्यशिक्षा
व्या र्थं ग्रंथे निबंध्नन् मंगलाचरणे ज्ञेनार्थाद्विषयप्रयोजनसंबंधाधिकारिणः समस्त
प्रयोज विषते। ज्ञातार्थं ज्ञानसंबंधं श्रोता श्रोतुं प्रवर्त्तते॥ शास्त्रादौ तेन वक्तव्यः संबंधः स
नं प्रयोजनं इति न्यायेन श्रोतृणां सुखप्रवृत्तये ग्रंथादौ अनुबंधचतुष्टयस्याव
श्यवाच्यत्वात्॥ तदुच्यते॥ का दशास्त्रस्येदं प्रकरणं। अस्तदीयानुबंधचतुष्टये
नैव ज्ञस्यापि तद्वत्वं॥ तत्र च परमेश्वरो माहान्॥ विषयः॥ मोक्षश्च महत्प्रयोजनं॥ पदा

पा२

मित

ध्यो अवांतरविषयः। तत्त्वज्ञानमवांतरप्रयोजनं॥ विषयशास्त्रयोः प्रतिपाद्यप्रति
पादकभावः संबंधः॥ विषयप्रयोजनयोर्विषयविषयिभावः संबंधः॥ शास्त्रप्रयोजनयोः
साध्यसाधनभावः संबंधः प्रयोजनकामोऽधिकारी॥ नन्वेवं शास्त्रप्रकरणयोः को भेद
इति चेत्॥ शास्त्रैकदेशसंबंधं शास्त्रकार्यांतरे स्थितं॥ आहुः प्रकरणं नाम ग्रंथभेदं
विपश्चित इति लक्षणभेदः॥ बालबोधनमवांतरप्रयोजनं॥ श्री॥ अथेदानीं चिकीर्षि
तग्रंथमारंभमाणः पदार्थसामान्यं स्वरूपतो निर्दिशति॥ प्रमितिविषयाः पदार्था इति
॥८॥ पदार्थ इति सामान्येनोद्देशः तेषां स्वरूपप्रमितिविषया इति। प्रमितिर्नाम यथार्थज्ञा
न तस्य विषयाः प्रमेया इत्यर्थः। प्रमेयत्वमेव पदार्थशब्दस्य प्रवृत्तिनिमित्तं अने
न दर्शितं॥ ननु प्रमितिविषयत्वं पदार्थसामान्यलक्षणं॥ केवलान्वयित्वेन प्रमेयत्व ॥
स्य लक्षणत्वायोगात्॥ केवलव्यतिरेकी हेतुर्विशेषणो लक्षणमिति॥ तल्लक्षणस्या
भिधास्यमानत्वात्॥ नन्वत्रापि भ्रमविषयो व्यावर्त्योऽस्तीति चेत्॥ न। तस्य कदा
चित्प्रमेयत्वात्॥ शुक्तिर्वा रजतं तादात्म्यं भ्रमविषयः रजतत्वे संसर्गो वा ते सर्वे प्र

भा
9

नै६ वा१

मेयाएव॥ तदानींप्रमाविषयोनभवतीतिचेत्॥ तर्हिपदार्थानामेवस्मृति
विषयतासमयेऽपदार्थत्वापत्तिः। कदाचित्प्रमेयाएवेतियदिभ्रमविषयोऽपि
तर्हितथेतितुल्यं। किंच॥ पदार्थशब्दोयौगिकोरौढिकोवा॥ आद्येभ्रमविषय
स्यापिपदार्थत्वात्तद्व्यावर्त्तनमयुक्तंस्यात्॥ ळक्षणेनहिळक्ष्यादन्यत्व्यावर्त्य
तेननुळक्ष्यमेव॥ भ्रमविषयस्यपदार्थशब्दवाच्यत्वाळक्ष्या [illegible] एव। नद्वि
तीयः॥ रूढि [illegible] सदापदार्थ्यामेवमैवभ्रमस्यापिविषयः। अन्यथाऽन्यथा र
त्यनुपपत्तिः॥ अन्यत्रसदेवान्यत्रदोषाभाँतीतित्यन्यथाख्यातिः॥ तथाचद्वि
तियपक्षेऽपिसदापदार्थ्येवभ्रमविषयइतितस्यापिळक्ष्यत्वात्व्यावर्त्तनंपूर्ववत्
तद्व्यर्थमेव॥ प्रमेयत्वंव्यतिरेकिधर्म्मइतिवदतोवैशेषिकस्यापसिद्धांतश्च।
आकणादमुनेरद्ययावत्प्रमेयत्वाभिधेयत्वादिधर्मःके [illegible] वळान्वयीतिसिद्धांत
प्रवादस्यप्रतीयमानत्वात्॥ ननुयथकारएवपदार्थसामान्यळक्षणंकृतमि

मितभा

षि 10

तिवक्ष्यति अतस्तद्विरोध इति चेन्न ॥ तत्र कृतस्य गतिं वक्ष्यामः ॥ ननु भ्रमविषय
स्यापि प्रमेयत्वे कथं तस्य भ्रमत्वप्रसिद्धिरिति चेन्न ॥ शृणु ॥ इदंतत्त्वरजतत्वयोः व्यधिक
रणयोरिदं रजतमिति सामा नाधिकरण्येन विषयीकरणात् ॥ व्यधिकरणप्र
कारकत्वेन भ्रमत्वमिति तत्तत्स्वस्वरूपकथनं प्रवृत्तिनिमित्तकथनं चेतिस्त मिति ॥ द
के ते पदार्थाः कियन्त इति जिज्ञासायामाह ॥ ते चेति ॥ ते पदार्थाः स प्तैवेति संबंधः ॥
द्रव्यस्य सर्वपदार्थाधारत्वेन समवायिवाकारणत्वेन च प्राधान्यात्प्रथममुद्देशः ॥
॥१९॥ गुणजातीयस्य सर्वद्रव्यवृत्तित्वात् तस्युत्तरक्षणमेवनुत्पन्नत्वेनापि सान्नि
ध्याद्गुणस्य तदानंतर्यं ॥ कर्मजातीयस्य तद्वैपरित्यात् जात्याधारत्वाच्च तदा ॥८
नंतर्यं । सामान्यस्यानुवृत्तित्वेन त्रितयगतत्वेन च बहुविषयत्वात्तदानंतर्यं ॥ विशे
षस्य समवेतत्वात् सामान्यप्रतियोगित्वाच्च तदानंतर्यं ॥ एतेषां पंचानां संबंध
वे न समवायस्य तदानंतर्यं ॥ षण्णां निषेधरूपत्वेनाभावस्य तदानंतर्यमित्युद्देशक्रमः ॥
एवमुत्तरत्राप्यूहनीयं विस्तरभयान्नातिप्रयोजनत्वाच्चोच्यत इति ॥ एवकारोऽयोगा

त्रा१ अनुगतबुद्धिजनकत्वात्२४ नो१ दा२

न्ययोगव्यवछेदार्थः॥ अत्रै तावदस्तेव नन्यूनमिति तावदयोगव्यवछेदः॥ अन्य
स्यात्र संबंधो नास्तीत्यन्ययोगव्यवछेद[illegible]॥ तथा चशंखः पांडुर ऐति वत्सपदार्थाः
सप्तैवेति वचनव्यक्तयो संख्यायाः विशेषणत्वे विशेषणसंगत एवकारोऽयोगंव्य
वछिनत्ति। यदा तु पार्थ एव धनुर्धर इतिवत् सप्तैव[illegible] पदार्था इति विशेष्यसंगत
एवकारः अन्ययोगं व्यवछिनत्ति इत्युभयव्यवछेदसिद्धिः॥ यथावस्थितेन एव
कारेण भवति। एवमग्रेप्येवकारो द्रष्टव्यः। तेचेति। चकारो जिज्ञासानिवृत्त्यर्थः। २
गुणान्विभजते गुणाश्चेति। तुशब्दः पूर्ववैलक्षण्यद्योतनार्थः गुणेषु यद्यपि गुणा न गी
काराश्चतुर्विंशतिरित्युक्तं॥ [illegible]गसिद्धामेव संख्यां स्फु[illegible]दयति॥ १
द्रव्याणि परिसंचष्टे॥ तत्रेति॥ तत्र सप्तसु मध्ये इत्यर्थः॥ तथापि संख्या गुणयोरेका
र्थसमवायसंबंधादुपचारेण तत्र संख्याव्यवहार इति न दोषः॥ कर्माणि विशेषन
र्दिशति कर्माणीति॥ ननु संयोगविभागपरंपराव्यतिरेकेण कर्मैव न पश्याम
इति चेत्। न ह्ययस्थाणोरपराधो यदेनमंधो न पश्यतीति वछतीत्येवमाकारेणास

मितक्ष्म योगादिविलक्षणप्रत्ययस्य सर्वजनीनत्वात्॥ न चेदं प्रत्येत्वामिति चेत्। तत्रा षि ॥
पि अनुभव एवोत्तरं। चलनं साक्षात्करोमीत्यनुभवात्। भ्रमणारेचनस्पंदनन
मनोन्नमनानां गमनेंतर्भावान्नावधारणानुपपत्तिः॥ संख्या त्वौपचारिकी॥ नप
चारस्क संख्याकर्मणोरेकद्रव्याश्रितत्वात्॥ एवमग्रेऽपि। सामान्यं त्रेधा विविनक्ति॥
सामान्यं चेति। विशेषाणां विभागाभावे हेतुमाह॥ विशेषास्त्विति। अनंताः अ
संख्याताः। तत्र हेतुः। यावन्नित्यद्रव्यवृत्तित्वादिति॥ यावंति नित्यद्रव्याणि गगनो
दिपंचकचतुर्विधाः परमाणवः तत्रैंर्चिर्येषां तेषां भावस्त्वं तस्मान्नित्यद्रव्याणां द
।१०॥ असंख्यातत्वेन तदाश्रिताः विशेषा अनंता इत्यर्थः॥ ननु नित्यगुणेषु किमिति विशे ।१
षा नाभ्युपेयंते॥ जात्या तद्व्यावृत्तिसंभवान्नाभ्युपगम्यं इति चेत्। हंत तर्हि जातिगुण त८
क्रियाभिर्नित्यद्रव्याणामपि व्यावृत्तिसंभवात्। तत्रापि तदभ्युपगमो न युक्तः॥
अथ द्रव्ये ऽभ्युपेयंते तर्हि गुणे [illegible]भ्युपेयतामिति चेत्। मैवं॥ नित्यगुणा हि जल
पवा१ परमा[illegible]दिगताः रूपादयः तेषां व्यावर्त्तकाः। रूपत्वावांतरजातयः शुक्लतमत्वा।

नो२ क्ष२ न४

दयः संभवंति॥ अवांतरजातीयव्यक्तिष्वपि विशेषास्तिता अत्र यविशेषेण तद्व्याव
त्तिः संभवति। गगनात्काळदिशोः तयोश्चपरस्परमुक्तात्मनां मिथो मनसां चेतरेतर
व्यावृत्तिः विशेषपदार्थ्यांतरं विना योगीनां न संभवति॥ परमाणुषु सत्ताद्रव्यत्वपृथ्वी
त्वादिव्यतिरिक्तावांतरजातेरभावात्तेष्वपि समानजातिगुणकर्म्मसु मिथो व्यावृत्तिबु
द्धेर्विशेषपदार्थं विना संभवात्॥ तत्रापि [illegible] त स्सिद्धिप्युक्तः।
कुतः। परमाणुषु नावांतरजातिरिति चेत्। परमाणुषुवृत्तिजातेरस्य कार्यवृत्ति
दर्शनात्पृथ्वीत्वादिवत्। सापि जातिर्घटादौ वर्तते॥ तथा च नावांतरजाति
मत्वमिति। तस्मान्नित्यद्रव्येष्वेव विशेषपदार्थयोगीकारो नान्यत्रानित्येष्विति सा
धूक्तं॥ यावन्नित्य[illegible]व्यवृत्तित्वादनंता एवेति॥ समवायं विभागाभावे हेतुमाह॥
समवायस्त्वेक एवेति इह तंतुषु पटः इह पटे शौक्ल्यं इह चळनं परत्वं चेत्यादि
द्रव्यगुणकर्म्मसामान्यप्रत्ययाः विशेषणविशेष्यसंबंधनिमित्ताः। अबाधित
प्रत्ययत्वादिह कुंडे बदरवदित्यनुमानेन ळाघवतर्कसं[illegible] न एक एव सिध्यति
नौः

मित

घि कि्प
क

भा 12

एकेन सर्वत्र व्यवहारोपपत्तौ तदनेकव्यनायां गौरवात् इति समवायैकत्वसिद्धिः
अभावं विभजते ॥ अभाव इति इह पटो भविष्यतीति प्रागभावः प्रतीयते ॥ स न
ष्ट इति प्रध्वंसः ॥ घटः पटो न भवतीत्यन्योन्याभावः । प्रतियोगिसमवायिव्यतिरि
क्त इह पटो नास्तीत्यादि निषेधः त्रैकालिकोऽत्यन्ताभावः । सं प्रति पृथिवीं पृथक्
करोति पृथिवीति । प्रमाणुसद्भावे प्रमाणं । त्रसरेणुः सावयवावयवारब्धः ज
॥११॥ न्यमहत्वाधिकरणत्वात् ॥ घटवदिति । त्र्यणुकस्यावयवि द्व्यणुकं सावय य
वः परमाणुः सोपि चेदनित्यः स्यात्तस्यापि हेतुपरंपरानुसरणे अनवस्था ॥
स्यात् । तथा चानवधिकानेकावयवारब्धं ॥ सर्वं कार्यमिति मशकमातंग
मा८ योस्तुल्यपरिमाणत्वापत्तिः । तस्मात् सर्वं कार्यद्रव्यावधित्वेन नित्यः परमाणुः सि
ध्यतीति नित्यपृथिवीसिद्धिः द्व्यणुकमनेनैव सिध्यति । एवमग्रेपि परमाणुसा
धनं प्रमाणं द्रष्टव्यं ॥ अनित्याया यां स्त्रेधि विध्यमाह । सा पीति शरीरमिंद्रियं विष
यस्वरूपं स्वरूपं यस्याः सा । तथा पार्थिवशरीरादिसदित्रयसिध्योप्रमाणमाह । शरी

मा४

रमिति। गंधव्यंजकपदेन प्रमाणेस्त्वितं॥ घ्राणं पार्थिवं रूपादिषु पंचसु मध्ये गंध
स्यैवाभिव्यंजक[illegible]त्वात्॥ वायूपनीतसुरभिचंपकभागवदिति घ्राणस्य पार्थि
वत्वं॥ आपो विभागं प्रापयति॥ आपो पीति। वरूण[illegible]लोक इति आगमसिद्धमिति
शेषः॥ रसव्यंजकमिति रसनेंद्रियस्य आप्यत्वे मानं। रसनेंद्रियमाप्यं रूपादिषु
मध्ये रसस्यैवाभिव्यंजकत्वात्। ळाळावदिति प्रयोगः। तेजो विभजते। जोते
प्पा पीति। अत्रा[illegible]दित्यलोक इत्यनंतरं पुराणादिसिद्धमिति शेषः॥ इंद्रियमिति।
तैजसं चक्षुः रूपादिषु मध्ये रूपस्यैवाभिव्यंजकत्वात्॥ मनो व्यावर्त्तनाय एव
कारः। असिद्धत्ववारणाय रूपा[illegible]ष्वित्युक्तं॥ अन्यथा रूपत्वस्यापि व्यंजकत्वे
नासिद्धिः स्यात्॥ विषयस्य चातुर्विध्यमाह॥ विषय इति। नन्वाकरजं सुवर्णं
तत्र पार्थिवं नैमित्तिकद्रवत्वाधिकरणत्वात् ळाक्षावदिति। पीतिमैणाधिकरणत्वा
द्रापितपटवदिति॥ सुवर्णस्य पार्थिवं[illegible]द्धेः कथं तैजसत्वमिति चेत्। मैवं॥ त
स्य पार्थिवत्वे अत्यंतानळसंयोगे सति द्रवत्वविनाशापत्तेः। द्रव[illegible] पार्थिवत्वेन

ता२ तर२ गु२

द्रौ १ दि १

घृतव[illegible]मानत्वेंधनत्वापत्तेश्चेतिति बाधकतर्कपराहतमनुमानं॥ तैजसत्वेचैतत्त
र्कसहकृतमनुमानं।सुवर्णनपार्थिवं॥ असतिविरोधिद्रवद्रव्यसंबंधेअत्यंतामि
संयोगेसतिअनुछिद्यमानद्रवत्वाधिकरणत्वादाप्यपरमाणुवदितिपार्थिवव्य
तिरेकसिद्धोनैमित्तिकद्रवत्वेन जलव्यतिरेकसिद्धेः।रूपवत्वेनपरिशेषात्तै
जसत्वसिद्धिः॥ वायुंविविनक्ति वायुरपीति। इंद्रियमिति। त्वगिंद्रियंवायवीयं
रूपादिषुपंचसुमध्येस्पर्शस्येवाभिव्यंजकत्वात्।अंगसंगिसलिलशैत्याभि
व्यंजकव्यजनवातवदिति॥ त्वगिंद्रियस्यवायुत्वेमानं।कंपजनकद्रव्यत्वेनवा
योरतींद्रियत्वात्कंपस्पर्शाश्रयइति लिंगगम्यत्वंसू यामास।प्रयोगस्तुप्रयत्नाभा
वेसतिशाखाकंपः॥ स्पर्शवद्द्रव्यं जन्यःकंपत्वात्।शारीरादिजन्यकंपवदिति
परिशेषाद्वायुसिद्धिः।शरीराभ्यंतरचारीश्वासोछासरूपः॥ प्राणवदपानादी
नामाधिक्यमाशंक्याह॥ सएवेति॥ प्राणएवअपानसमानव्यानो दानसं
ज्ञाः लभतइत्यर्थः।ननुस्तिमितोवायुःपंचमोस्तीत्यतआह॥ स्तिमितेति॥ स्ति
हृदिप्राणोगुदेयानःसमानोनाभिमंडले उदानःकंठदेशेस्याद्व्यानःसर्व
गः

॥१२॥

न्दैगत दुर्य

॥ व

मितो वायुः परमाणुसमूह इत्युक्ते पंचविधकार्यत्वेपि न दोषः॥ कार्यस्यापि परमा
णुरूपसंभवात् परमाणूनामेव परंपरया कार्यावयवत्वात्। अत आह॥ अना २
रब्धद्रव्य इति। अनारब्धं द्रव्यं येन स तथा॥ यद्यपि स्तिमितवायोः परमाणुरूपत्वे
व्यंजनादिव्यापारानंतरं तदीयः स्पर्शो न गृह्यते। परमाणुस्पर्शस्यातींद्रियत्वा
त्॥ तथापि तदीयस्पर्शानुपलंभेपि व्यंजनादिव्यापाररूपनिमित्तसहकारि
ळाभादारब्धकार्यस्य स्पर्शोपळंभाद दोषः॥ तस्मान्नित्यवायावेतस्यां तभो
व इति नाधिकत्व॥ आकाशस्यस्वतएकत्वेपि औपाधिको विभागोस्त विष्यतीत्या
त्रास्य तदभावे हेतुमाह॥ घटाकाशादिति। उपाधिनामनंतत्वादौपाधिको
विभागो न संभवतीत्यर्थः॥ काळस्योपाधिकं विभागमाह॥ नश्यतीति। पदार्था
नामुत्पत्तिस्थितिविनाशैर्ळक्ष्यत इति। उत्पत्तिस्थितिविनाशळक्षणः॥ उत्पत्त्या
भविष्यत्॥ स्थित्या वर्तमानः॥ विनाशेन भूत[illegible]ळो ळक्ष्यत इति त्रिविध

का१

मित

भा 14

इत्यर्थः ॥ दीनामुपाधीन्विभजते । दिगिति ॥ सर्वं च देवतार्थे इदमर्थे वा तद्धि-
तः । टिड्ढाणञिति ङीपू अग्नेर्ढक् ॥ यमाण्य इति विशेषः । रौद्री अंतरिक्षस-
स दैः ॥ गगनादीनां स्वभावभेदाभावे हेतुमाह ॥ आकाशादीति ॥ आकाशं ता-
वच्छब्दलिंगकं । शब्दाश्च सर्वे समानाधर्मे तथा हि ॥ विवादाध्यासिताः शब्दाः
श्रूयमाणशब्दाधारसमवेताः शब्दत्वात् ॥ श्रूयमाणशब्द [illegible]
संयोगाद्विदोसाध्या वदिति ॥ नच श्रूयमाणे शब्दत्वमुपाधिः ॥ श्रूयमाण-
स्य विशेषणस्य साधनव्याप्तिपरिहारार्थत्वेन पक्षेतरत्वात् ॥ श्रूयमाण-
॥१३॥ शब्दाधारसमवेतसंयोगादौ साध्याव्यापकत्वाच्च ॥ दिक्कालयोरपि
परत्वापरत्वानुमेयत्वेन सिद्धावेकत्वसिद्धिः ॥ तथा हि ॥ तरणिपरि-
स्यंदलक्षणाहोरात्रादिबहुत्वाल्पत्वाभ्यां विशिष्टे पिंडे परौंबुद्धि जायते ॥ प

श्री १

'नोपाधि ४

तरणिपरिस्पंदस्य चसूर्यसमवेतत्वेन स्वतः पिंडसंबंधत्वासंभवात्सू
र्यस्य च मूर्त्तत्वेन आश्रयद्वारापि संबंधाभावात्॥ न च पृथिव्यादीनां
तत्संबंधघटकता॥ मूर्त्तत्वात्॥ आत्माकाशयोश्च विशेषगुणवत्त्वेन
घटादिवत्तद्घटकत्वात्॥ ततश्च तरणिपरिस्पंदपिंडसंबंधघटकत
या सिद्धं यद्व्यापकं द्रव्यं स एव कालः॥ पिंडस्य च तरणिपरिस्पंदेन संयुक्त
संयुक्तसमवायलक्षणः संबंधः॥ दिगपि अनियतपरत्वापरत्वाभ्यां प्रमात्स्वेवि
प्रकृष्टसन्निकृष्टदेशावर्त्तिपिंडसमवेताभ्यामनुमीयते॥ तथाहि॥ कालस्यज्ये
ष्ठत्वकनिष्ठत्वादिनियत परत्वापरत्वबुद्धिहेतुकत्वेन सिद्धस्य अनियतप
रापरबुद्धिहेतुकत्वासंभवात्॥ तत्साधनत्वेन सिद्धं यद्द्रव्यं सा दिक्॥ दि
कालयोश्चैकत्वेनैव व्यवहारोपपत्तौ कल्पनाभेदेन वा व्यवहारभेदेन वा

मि

षि 15

ऽनेककल्पनायां मानाभावात्॥ आत्मपदार्थं विभजते॥ आत्मा त्विति॥ नन्व
ष्टद्रव्यातिरिक्त आत्मपदार्थ एव नास्तीति कथमयं विभागः॥ तथाहि॥ कायाका
रपरिणतभूतचतुष्टयमेवात्मपदार्थस्तत्रैव चैतन्यं॥ ननु यदि भूतेषु चैतन्यं
तर्हि घटादेरपि चैतन्यापत्तिरिति चेत्॥ न॥ मदशक्तिवादविरोधात्॥ यथा क्र य
दि मुकफलचूर्णिषु प्रत्येकं मदजनकत्वाभावेऽपि समुदाये तज्जनकत्वं पश्यामः।
तथा घटाद्याकारे तदभावेऽपि शरीराकारपरिणते भूतचतुष्टये चैतन्यो
॥१४॥ पपत्तेः॥ प्रमाणं च अहं स्थूलः॥ कृशः कृष्णो गौर इति शरीरसामानाधिकरणं
प्रत्यक्षमेव॥ ततः पृथिव्याद्येतभ्यो नादात्मपदार्थस्य अतिरिक्तविभागो न युक्त ॥०
इति चेत्॥ तदसारं॥ शरीर[illegible]मते बाल्ये दृष्टं कौमारादौ न स्मरेत्। बाल्यकौ
मारादिशरीराणां यावद्द्रव्यभाविपरिमाणभेदेन भेदात्॥ अन्यानुभूतस्या

आर

अनुभूतं र एकं शरीरं न र न चगत्यरं स्थिरं

न्येनास्मरणात्॥ नहि चैत्रेणानुभूतं मैत्रः स्मरति॥ तदुक्तमुदयनाचार्यैः।
नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात्॥ वासनासंक्रमो नास्ति॥ स्थि
रसंस्कारस्य आश्रयेकल्प्यमाने आश्रयव्यतिरिक्तागतिर्नास्ति॥ अपक्रमो वि
नाशः॥ वासनासंस्कारः॥ किंच॥ शरीरं नात्मा। रूपादिमत्वात्। घटवत्।
न चाचेतनत्वमुपाधिः। रूपादिमत्वेनैव शरीरस्याप्यचेतनत्वेन नुपाधेः
साधनव्यापकत्वात्॥ हेतोरनुकूलस्तर्कस्तूक्तएव बाध्ये दृष्टमित्यादिना।
सामानाधिकरण्यप्रत्ययस्य भ्रांतः यौक्तिकबाधसद्भावात्॥ ममशरीरमिति
भेदप्रत्ययाच्च॥ तस्मान्नशरीरमात्मा। तथाप्यतिरिक्तात्मसद्भावे किंप्रमाणं
मानमितिचेत्॥ एवंस्तावदुक्तएवनपरिशेषः॥ अपरंचमानेइच्छा क्वचिदाश्रिता गु
णत्वात्॥ रूपवत्। इच्छा गुणः। विशेषगुण इतिवा॥ अनित्यत्वे सत्येकेंद्रियग्राह्यत्वा
त्॥ रूपवत्। जन्येच्छायाः पक्षीकृतत्वात्। नेश्वरेच्छायासागासिद्धिः॥ आत्मनो

३ इसनुमाने न [illegible] नासत्वं रा

नित्यत्वात्समवायाच्च गुणत्वात् नाऽव्यभिचारः॥ द्रव्यत्वे वाऽयासुषज्ञयुक्तविष
यत्वादिति विशेष्यं कर्त्तव्यं॥ तद्वारसत्वादिति॥ तदन्यत्वे सतीति विशेषणीयं
सा तु न भूतपंचकगुणः॥ नापि दिक्कालमनसां मनसैव ग्राह्यत्वात्॥ विशेषगु
णत्वाद्वेत्युत्तरत्र हेतुः॥ एवमितरबाधकसहकृतेन सामान्यतो दृष्टेन व्यति
रिक्तात्मसिद्धिः। यद्वा इतरबाधप्रदर्शनानंतरमिष्टा अष्टद्रव्यातिरिक्त
द्रव्याश्रिता॥ अष्टद्रव्यानाश्रितत्वे सति गुणत्वात्॥ यन्नैवं तन्नैवं॥ यथा रू
पादीति व्यतिरेकिणात्मसिद्धिः यदष्टद्रव्यातिरिक्तद्रव्यं सैवात्मापदार्थः॥ इ
ति सूक्त एव तस्य विभागः। श्रोत्रज्ञानं विभागकरणे हेतुमाह अनेनैतावेवेति॥ ॥१५॥
मनसो विभागाकरणे हेतुमाह॥ तस्यात्मेति। आत्मनोऽप्रतिशरीरं भिन्नत्वेना
नंतत्वाच्च निष्ठं मनोऽप्यनंतमित्यर्थः। ननु मनसः सर्वदा स्पर्शरहितद्रव्यत्वेन
विभुत्वात्कथमात्मनिष्ठत्वमिति चेत्॥ युगपज्ज्ञानानुत्पत्तिलक्षणधर्मि

ना४

ग्राहकमानेना [illegible] गुणत्वसिद्धिः। चाक्षुषज्ञानवतो मै
त्रस्य स्वस्वविषयसंबद्धानि घ्राणरसनत्वक्श्रोत्राणि स्वस्वविषयसाक्षा
त्कारकारणसंयोगशून्यानि तदानीं स्वविषयसाक्षात्कारजनकत्वात्॥
अंधकार घटवदित्येननेत्यर्थः॥ नवानाम परं विभागमाह॥ आकाश
दीति नित्यानित्यमिति॥ परमाणुकार्यकार्यभेदादित्यर्थः॥ रूपादिनावां
तरविभागं दर्शयति। रूपमिति। सितादीनामाभेय व्याप्यवृत्तित्वेनाव्या
प्यवृत्तित्वयोगात्॥ चित्रः पट इत्याद्यनुभवाच्चासप्तमं रूपमस्त्वें मिति
मत्वाह॥ चित्रभेदादिति। तत्रापि जले शुक्लमेव रूपं शुक्लं भास्वरमेव तेज
सि इतरापि भस्मावेव पाकजानि च॥ रसोपीति मधुरः शर्करादौ तिक्तो निंबा
दौ कटुः मरीच्यादौ कषाय आमळक्यादौ अम्ळ आमादौ। लवणं

स्व

प
म
ज
य
॥

17

प्रसिधं ॥ षट्रसा हरीतकीति चित्ररसोनुभवमवळ व्याह चित्रभेदादि
ति तत्रापि जळे मधुर एव रसो हरीतक्यादावभिव्यंग्यो ऽपाकजः इतरे तु भूमावेव
पाकजाः ॥ गंधेति ॥ सुरभिश्चंदनादौ असुरभिर्मद्यादौ ॥ स्पर्श इति ॥ शीतस्प
र्शो जळे ॥ उष्णस्तेजसि । अनुष्णाशीतो वायौ भूमौ स एव पाकजः ॥ परिमा
णमिति ॥ अणुत्वं ह्रस्वत्वं च परमाणुद्व्यणुकयोः । महत्वं दीर्घत्वं आकाशघटा
दौ कुवळयामळकादौ अणुत्वह्रस्वादिव्यवहारो गौणः ॥ पृथक्त्वमिति ॥ अने
कवृत्ति द्विपृथक्त्वादि ॥ संयोग इति स्थाणुश्येनयोरन्यतरकर्मजः । म
ल्लयोर्मेषयोरुभयकर्मजः ॥ तंतुकेशसंयोगात्पटकेशसंयोगः ॥ संयोगजः ॥
तथाहि ॥ पटारंभकतंतुकेशसंयोगः कर्मजः । ततः पटोत्पतौ केशपटसंयोगो
न कर्मजः ॥ उभयत्रान्यतरत्र वा कर्माभावात् ॥ तंतुकेशसंयोग एव हेतुः ॥
विभागोपि संयोगवदेव ज्ञेयः ॥ वृधतरुणयोः परत्वापरत्वे कालकृते ॥ सन्निकृष्टे

॥१६॥

॥१६

अ·

विप्रकृष्टे परत्वं १
कु१ कु१ कर्तं ५

परत्वं च दिक्कृते॥ तयोर्दिक्कालजन्यत्वं पुरस्तादेव प्रसाद्धिं॥ बुद्धिभेदमाह॥ बुद्धि
रपीति॥ प्रमानिरूप्यत्वेन पुरस्ताद्विभक्तामपि अप्रमां सूचीकटाहन्यायेन प्राग्विभ
जते॥ अप्रमापीति॥ ननु सर्वज्ञानानां यथार्थत्वात्॥ संशयविपर्ययाभावात्॥ क
थं तद्विभाग इति प्राभाकरः॥ मानं च॥ ज्ञानत्वं यथार्थमात्रवृत्ति॥ ज्ञानमात्रवृ
धर्म ५ त्तित्वात्॥ प्रमात्ववदिति॥ यथार्थत्वं तद्वति तत्प्रकारकज्ञानत्वं॥ तच्छब्देन ज्ञानविषय
वृत्ति घटत्वादिकमुच्यते॥ तेन घटत्ववति घटे घटत्वप्रकारकं ज्ञानं यथार्थमि
त्यर्थः॥ भ्रमे तु नैवं॥ पुरोवर्त्तिशुक्तिशकले रजतत्वस्याभावेन रजतत्ववति र
जतत्वप्रकारत्वाभावात्॥ किंतु रजतत्वाभाववति शुक्तिशकले रजतत्वप्रका
रत्वं ततो यथार्थत्वं भवदभ्युपेतं भ्रमं न व्याप्नोति॥ हेतौ तु प्रमेयत्वादौ व्यभिचा
रवारणाय मात्रपदं॥ तस्मादयुक्तो विभाग इति चेत्॥ उच्यते॥ प्रत्यक्षविरुद्धता
वदनुमानं॥ अहमत्र संशये ममात्र संशयः समजनीति संशयानुभवात्॥ त

नि५ का५ का५

था शुक्तिकामिमामहमेतावंतंकाळंरजतमिति अज्ञासिषमिति विपर्ययानुभवा
त्॥ तथा च काळात्ययापदिष्टमनुमानं। तथाप्ययथार्थसद्भावे किं मानमिति
चेत्॥ एकं तावदुक्तमेव प्रत्यक्षं॥ अपरं चानुमानं॥ ज्ञानत्वमयथार्थवृत्ति सकळ
ज्ञानवृत्तित्वात्॥ सत्तावत्॥ न च साध्यवैकल्यं॥ अयथार्थव्यवहारे गुरुमते
पि सद्भावेन संप्रतिपन्नत्वात् साध्यस्य॥ न चायथा[illegible]नुभवत्वादौ व्यभिचारः॥
तेषां सकळज्ञानवृत्तित्वाभावात्॥ न च ज्ञानान्यवृत्तित्वमुपाधिः॥ स्मृतेरयथा
र्थायापि सद्भावेन स्मृतित्वस्यायथार्थवृत्तित्वेपि ज्ञानान्यवृत्तित्वाभावेन सा
ध्याव्यापकत्वात्॥ तस्मादयथार्थज्ञानसत्वाद्युक्तोयमप्रमाविभागः॥ प्रमां
विभज्यते प्रमेति॥ सन्नविधत्वेश्वरादिभेदेनेति वक्ष्यति। लिंगस्य त्रैविध्यमा
ह॥ केवलान्वयीति। क्रमेणोदाहरणानि॥ शब्दोभिधेयः प्रमेयत्वात्॥ जीवच्छ
रीरं सात्मकं प्राणादिमत्वान्यदेवं न तदेवं यथा पाषाण इति॥ अनित्यः श

स्या३ स्य२

ब्दः कार्यत्वात्॥ यत्कार्यं तदनित्यं यथा घटः॥ यदनित्यं न भवति तत्कार्यमपि
न भवति यथा गगनमि। त्रिविधस्यापि द्वैविंमाह॥ तदपीति॥ यत्र स्वयमेव लिंगं
दृष्ट्वा लिंगिनं जानाति तः[illegible]र्थं॥ यत्र स्वयं निश्चित्य परं बोधनाय पंचावयववा
क्यप्रयोगस्तत्परार्थं॥ पंचावयवानाह॥ परार्थंगानीति॥ क्रमेणोदाहरणानि।
पर्वतोयं वह्निमान् धूमवत्वात्माहानसवत्॥ तथा चायं धूमवान्॥ तस्माद्व
ह्निमानेवेति॥ स्वार्थपरार्थंगान्याह उभयांगानीति। पक्षे व्याप्यवर्त्तमान
त्वं पक्षधर्म्मत्वं सपक्षे व्याप्यैकदेशे वा सत्वं सपक्षे सत्वं॥ विपक्षे सर्वस्मिन्नव
र्त्तमानत्वं। विपक्षाद्व्यावृत्तिः॥ पक्षे साध्यस्य प्रमाणांतरेण बाधविरहो
धितविषयत्वं॥ असत्प्रतिपक्षो यस्य तस्य भावस्तत्वं॥ साध्याभावसाधक
प्रत्यनुमानरहितत्वमिति पावृत्॥ अनुमानपरिशोधनायाह॥ तदाभासा इति
व्याप्तिपक्षधर्मताविशिष्टो हेतुः सिद्धः तद्रहितोऽसिद्धः। स च पक्षाभावादाश्रयासि

यथाजळधरः।२ सरोजारविंदत्वात्।२

धः। पक्षधर्मताभावात्स्वरूपासिधः॥ व्याप्यभावाद्व्याप्यत्वासिधः। इति त्रिविधः। क्र
मेणोदाहरणानि गगनारविंदं सुरभि अरविंदत्वात्॥ अनित्यः शब्दश्चाक्षुषत्वात्॥
विमतं क्षणिकं प्रमेयत्वात्॥ साध्यसाधनायप्रयुक्तो हेतुर्यदि तद्विपरीतं सा
धयति तदा विरूधः॥ यथा शब्दो नित्यः कृतकत्वादिति॥ अनुगतावित्यस्मा
ष्यन्तो तः शब्दो निश्चयवावी॥ एकेन साध्यरूपेणांतः सहचारनिश्चयो न विद्यते य
स्य सोऽनैकांतिकः॥ स च त्रिविधः यथा नित्यः शब्दः प्रमेयत्वादिति साधारणानै
कांतिकः। नित्या पृथिवी गधवत्वादित्य साधारणः॥ सकलसपक्षविपक्षव्या
वृत्तत्वात्। सर्वमनित्यं प्रमेयत्वादिति॥ अनुपसंहारी व्याप्त्युपसंहाररहि
ळाभात्। [illegible] तत्र पद् हेत्वा
भासपक्षोऽसाधारण एवानध्यवसितशब्देनोच्यते॥ साध्याध्यवसानायेनि
श्चयायनाळमित्यनवध्यसितः॥ स च षट् हेत्वाभासानभ्युपगच्छतावार्येणपृ

सति सपक्षे सप[illegible]क्षविपक्षाभ्यां व्यावृत्तः स असाधारणः ५

त
स्ट४
व

ग्युक्तः॥ उदाहरणं तु पृथिवी नित्या गंधवत्वात् अत्र सपक्षादाकाशादेर्विप
क्षाज्जलादेर्व्यावृत्तत्वेन साध्यनिश्चये तु मत्राक्यत्वादनध्यवसित उच्यते॥ कालस्या
त्ययेपगमे यः [illegible] निर्दिष्टः कालात्ययापदिष्टः। यथाऽनुष्णस्तेजो वस्तुत्वाज्जलव
दिति प्रयोगे वस्तुत्वानु[illegible]त्वयोर्व्याप्तिग्रहणसमय एव प्रत्यक्षेणानुष्णत्वप्रतियो
गितयोष्णत्वं कचिदवधारणीयं॥ प्रतियोगिनिरूपणं विनाऽभावनिरूपणा
संभवात्॥ ततो वह्नौ वर्त्ताव्याप्तिग्राहकेणैव प्रत्यक्षेण तेज[illegible]ष्णत्वमवधारितं॥ तस्या
न्यनिष्ठत्वासंभवात्॥ तथा च प्रत्यक्षेण विपरीतनिश्चये सति तद्विरोधे नानुमा
नकालस्यात्यये प्रयुक्तत्वादस्य कालात्ययापदिष्टत्वं नन्वयमाश्रयासिद्ध एव वा।
तेजसः साध्याभाववत्वेन निश्चितत्वात् संदिग्धसाध्यान्वितपक्षत्वा[illegible] संभवा
त्॥ पक्षस्यैव विपक्षत्वेनानैकांतिक एव वा॥ अतो नायं बाधितापरपर्यायः
कालात्ययापदिष्ट इति चेत्॥ सत्यं॥ तथा[illegible]पि पक्षे साध्याभावप्रमा[illegible]तरेणा

पा१

य
पि
त

19

सिध्यादेरनवगमात्साध्याभावप्रमारूपबाधस्योपजीव्यत्वात्प्रथमत्वं॥ तथाप्य
सकीर्णोदाहरणंकिमितिचेत्॥ श्रूयतां॥ अयंपर्वतोवह्निमान्धूमवत्त्वादित्येतदेवा
नुमानं॥ अत्रमाह नसीयोवह्निःपर्वतेबाधादेवनसिध्यति॥ असिध्यादेरत्राभा
वात्॥ अतोऽन्यदीयोवह्निरन्यत्रसाध्यमानःकालात्ययापदिष्टत्वादेवनसि
ध्यति॥ बाधकालात्ययापदिष्टयोःपर्यायतेव साध्याभाववत्तयाप्रमितेपक्षे
नभयोःप्रयोगात्॥ प्रकरणयोःप्रकृ योःसाध्यतदभावयोःसमःप्रकरणस
मः। साध्यविरोधित्वेनतदभावस्यापिप्रकृतत्वात्॥ उदाहरणंतु॥ अनित्यःश
ब्दःपक्षसपक्षयोरन्यतरत्वात्॥ ननुव्याप्यारोपेव्यापकारोपस्तर्कः॥ यथाधू
मानुमानेधूमोऽस्तुवह्निर्मास्त्वितिवह्न्यभावस्यव्याप्यस्यप्रति। वादिनाआरोपे
कृतेयद्यनग्निःस्यात्तर्हिनिर्धूमोपिस्यादितिधूमाभावस्यव्यापकस्यारोपः।
सचकिमितिनोद्दिष्टः॥ तथास्वप्नोनामनिद्रादुष्टमनोजन्यंज्ञानंचकुतोनोद्दिष्ट

॥१९।

॥

इत्यत आह॥ तर्केति॥ तर्कस्तावत्संशय एव॥ यद्यनग्निस्तर्हि निर्धूम इति यद्यालिं
गतत्वेनाग्निमत्त्वे धूमवत्त्वं संभवतीत्यपि प्रतीयते॥ तोस्तित्वनास्तित्वकोटिद्व
यविषयत्वात्॥ यद्वा दृश्यते च धूमस्तस्मादग्निरस्त्येवेति विपर्यवसानात [illegible]र्कः॥
तत्र न स्यादस्तिवेति कोटिद्वयस्यास्पृष्टत्वात्॥ स्वप्नस्तु गगनभक्षणाद्येमान
विद्यमानत्वेनासन्निहितं गजादि सन्निहितत्वेन दर्शयन्नु विपर्यय एव तद्भेदा
पाक्रांतत्वात्॥ नन्वयं घट इति विशिष्टं सवीकल्पकं ज्ञानं॥ प्रथमाक्षसंनि
पातजं निर्विकल्पकं॥ एतत् किमिति नोद्दिष्टमित्यत आह॥ सविकल्पकेति॥
रजत एवेदं रजतमिति सविकल्पकप्रमा अरजते रजतज्ञानं भ्रम इत्यर्थः॥ नि
र्विकल्पकं तु प्रमायामेवांतर्भवति तस्य प्रथमाक्षसंनिपातजस्य वस्तुस्व
रूपमात्रविषयकस्य क्वाप्यबाधात्॥ सर्वं ज्ञानं धर्मिण्यभ्रांतं॥ प्र[illegible]रे तु वि
पर्यय इति न्यायात्॥ निर्विकल्पकस्य च प्रकाराभावात्॥ ननु सोयं देवदत्तो

का२

स्ता
वि
ना

पे

इत्यतितवर्त्तमानदेशकाळत्रिष्टविषया ज्ञानं प्रत्यभिज्ञा ॥ इष्टे वस्तुनि विषये
इदं ग्राह्यमिति ज्ञानमुपादानबुद्धिः ॥ अनिष्टे त्याज्यमिति हे बुद्धिः ॥ तदुभयरहि
ते उपेक्षाबुद्धिः ॥ एतच्चतुष्टयं कुतो नोदिष्टमित्यत आह एवमिति ॥ प्रमायामप्रमा
यां चांतर्भाव इत्येवं शब्दार्थः ॥ अं[illegible]वमित्यन्वयः । बाधितानामप्रमायामबाधि
तानां प्रमायामिति विभागः ॥ ननु तथापि बाह्यालीकदेशे पुरुषेणानेन भवि
तव्यमित्यूहज्ञाने ॥ किंसंज्ञकोऽयं वृक्ष इत्यनध्यवसायज्ञानं ॥ अनयोः कुतो
नोद्देश इत्यत आह ॥ ऊहेति ॥ अंतर्भाव इति शेषः ऊहे पुरुषेणानेन भवितव्य
मित्यत्र न भवितव्यमित्यपि [illegible] स्फुरतीति संशयत्वं व्यक्तमेव ॥
किंसंज्ञकोऽयमित्यत्रापि चूतफनसो वेति विकल्पस्फुरणादनध्यवसायो
पि संशय एवेत्यर्थः ॥ ननु तर्कादीनां यदि संशयांतर्भावस्तर्हि तल्लक्षणेनैव
तेषां लक्षितत्वात् ॥ न पृथग्लक्षणाभिधानमुक्तं ॥ अंतर्भावनीयतर्कादिज्ञाना
नं, कोटि ४

यतल्लक्षणकथनं चेति ॥ ऊहादे[illegible]पि त[illegible] च्यं नार्धजरतीन्या[illegible]यो युक्तं इति चेत् ॥
।न॥ ऊहादेः स्पष्टत्वेन लक्षणानभिधानात्॥ बुद्धिपरीतत्वे नान्येषां तदभिधाना
दिति॥ क्रमप्राप्तं सुखं विभजते सुखमिति। ऐहिकं पारलौकिकं चेति द्विवि
धमित्यर्थः॥ सांसारिकशब्देन दुखमिश्रितत्वो[illegible]ः॥ दुःखस्य सर्वस्यापि
सांसारिकत्वान्न भेदकथनं॥ मात्रेणात्र साकल्यमुच्यते। इच्छाद्वेषयोः सु
खदुखविषयत्वं साध्यविषयत्वं॥ स्रक्चंदनाहिकंटकादिविषयत्वं साधनवि
षयत्वं॥ विहितमग्निहोत्रादि निषिद्धं कलिंजभक्षणादि॥ उदासीनं लौकिकभो
जनादि॥ एतानि विषयो यस्य स तथा॥ स त्रेधेत्यर्थः॥ गुरुत्वमिति॥ समाहारस्य
रूपमिव रूपं यस्य स तथा॥ एकैकमाषापेक्षया राशीकृतमाषस्य गुरुत्वाधि
क्यदर्शनात्॥ [illegible]तः समाहाररूपं गुरुत्वमुपाधिकमित्यर्थः॥ ननु गुरुत्वमेकमने
कवृत्ति॥ द्व्यासमाहारमात्रादाधिक्योपपत्तौ न व्यासज्यवृत्तित्वांगीकारः।

अ२ रा२ रा२

एकावयविनिष्ट एकद्रव्यनिष्ठं॥ अवयविपदेन द्व्यणुकस्य विवक्षितत्वात्॥ अन्यथा परमाणुगुरुत्वसंग्रहो न स्यादिति॥ तथा चैकद्रव्यनिष्ठं [illegible] गुरुत्वं [illegible] त्वं द्व्यानामनेकेषां समाहारे गुरुत्वमपि समाहृतमिव दृश्यत इति॥ सांसिद्धिकं स्वभावसिद्धं॥ द्रव्योत्पत्तिसमनंतरमेवोत्पन्नमिति यावत्॥ तच्च जलनिष्ठं। नैमित्तिकमग्निसंयोगाज्जायमानं घृतादिपार्थिवनिष्ठं सुवर्णादितैजसनिष्ठं च स्वाभावि[illegible]को जले औपाधिकस्तैलादौ॥ जलसंबंधेनात्र प्रतीयमानत्वात्॥ वेगः शरादौ। भावनानुभवजन्या स्मृतिजनिकात्मनिष्ठः॥ स्थितस्य पूर्वविद्यमानस्यावस्थाविशेषस्य स्थापकः॥ यथा कटादौ वेगवन्न क्रियादिजनकः॥ धर्मेति [illegible]ऽदृष्टः पुरुषं प्रवर्त्तयति स प्रवर्त्तकः॥ अनिष्टाच्च निवर्त्तयति स निवर्त्तकः॥ फलमवसानमंतो यस्य स तथा॥ अकृतप्रायश्चित्तस्य कर्म्मणो भोगादेव नश्यात्॥ नमस्कारेण मंगलमु

॥२१॥

॥२

च्यते॥ तेन प्रतिबधकदुरितरूपाधर्मनाशः॥ आदिपदात्प्रायश्चित्तादि
गृह्यते॥ कृते प्रायश्चित्ते ब्रह्महत्यादि नाशयति॥ वर्णात्मको गकारादिः॥ अ या २
वर्णात्मको मृदंगध्वन्यादिः॥ गुणानामनित्यत्वादिरूपेणापरं विभागमाह॥
अत्रेति। अन्य इति॥ रूपरसस्पर्शपरिमाणै [illegible] कपृथक्त्वगुरुत्वद्रवत्वस्ने
हाः॥ परमाणुगता नित्याः। कार्यगता अनित्याः॥ बुद्धीच्छाप्रयत्नाद्य ईश्वरग
ता नित्याः। जीवगताऽनित्या इत्यर्थः॥ प्रकारांतरेण तेषां विभागमाह॥ सं
योगेति। उभयरूपा इति। ईश्वरे व्यापकाः। अनीश्वरात्मन्यव्यापका इत्यर्थः॥
न्ये अ [illegible] रूपादय आश्रयव्यापका स्वाधारमभिव्याप्य वर्त्तंत इत्यर्थः। विहिता प्र
न्युत्क्षेपणादीनी। अर्घ्यप्रक्षेपादयः। निषिधानि मूत्रक्षेपादीनि उदासी
नानि ग्रामाव क्षेपादीनी॥ सामान्यस्यानुक्रं विभागमाह समान्यमिति। तत्रस
त्ता जातिः। परैव व्यापकत्वात्॥ द्रव्यत्वादीनी घटत्वाद्यपेक्षयापराणि। गुण व
× रूपरसगंधस्पर्शसंख्या। परिमाणपृथक्त्वगुरुत्वद्रवत्वस्नेहपरत्वापरत्वा [illegible] आश्रय व

त्वादीनि [illegible]ळत्वाद्यपेक्षयापराणि। कर्म्मत्वादीनि स्वावांतरजात्यपेक्षयापराणि
सत्तापेक्षया तान्यपराणि॥ ततो द्रव्यत्वादीनि परापररूपाणि॥ घटत्वादीन्य
पराण्येव। तद्व्याप्याभावात्॥ अतः सत्तादीनि जातिरूपाणीत्यर्थः॥ कर्मत्वा
दीत्यादिपदात्पृथिवीत्वादिग्रह्यते॥ पाकादिक्रियासंबंधात्पांचकत्वाद्यौ
पाधिकमित्यर्थः॥ प्रागभावादीनां विभागाभावे हेतुमाह॥ प्रतियोगीति॥
प्रतियोगीनामनंतत्वात्प्रागभावादयोऽप्यनंता इत्यर्थः॥ ननु मध्यत्वं नाम
पदार्थांतरं कुतो नोद्दिष्टमित्यत आह॥ मध्यत्वमिति॥ सन्निकृष्टत्वविप्रकृ
ष्टत्वयोः परापरबुद्धिकारणयोरभावे मध्यत्वबुद्धेर्जायमानत्वात्॥
तस्याभावेन्तर्भावइत्यर्थः॥ नन्वंधधकारः पदार्थांतरं वरीवर्तीति॥
सनतावद्गुणादिषट्करूपवत्वात्॥ क्रियावत्वाच्च गुणादीनां तदभावात्। तदु
क्तंप्रकारास्तापादभाव्यो। गुणादीनां निर्गुणत्वं निःक्रीयत्वइति। नाप्याको

॥२२॥

तर्भूतः।१२

द्रू२ वा१ काप्कद्भूतस्पर्शवत्त्वनियमात्२

त्र्यादिप्रत्यक्षे ततएव॥ मनोव्याव्यतिरिक्तरूपवत्त्वादेव॥ नापिपृथिव्यादिचतुष्टयं
स्पर्शरहितत्वात्॥ नचानुद्भूतस्पर्शकल्प्यः॥ कल्पकाभावात्॥ नचरूपवत्त्व व२
मेवकल्प्यकं॥ रूपवतः पृथिवीत्वादिजातीयस्य स्पर्शोस्यानुद्भूतत्वकल्पना
योगात्॥ तस्माद्दशमं द्रव्यमंधकारः सकुतो नोदिष्ट इत्यत आह॥ अंधका ओ
रोपीति॥ अयमाशयः॥ यद्यंधकारो भावरूपस्यात्॥ तदालोकनिरपेक्षचक्षु
र्ग्राह्यो नस्यात्॥ नचतेजसः तेजोन्तरानपेक्षत्वेपि चाक्षुषत्वात्॥ तत्र व्यभिचारः॥
तत्राप्यवयवविग्रहे चक्षुष्मत्तद्वयववापेक्षणात्॥ त्र्यणुके तदभाव इति चेत् तत
गत त्रापिजालान्तरसौरकिरणापेक्षणात्॥ अतो यच्चाक्षुषो भावरूपः स आलोक
निरपेक्षश्चक्षुर्ग्राह्यो न भवति। यथा घटादीति॥ यथा गगनादीति। इत्यापाद्या
पादकयोर्व्याप्तिग्रहण। तस्मादालोकाभाव एव अंधकारः। प्रमाणंतु। अंध
कारोऽभावः आलोकनिरपेक्षचक्षुर्ग्राह्यत्वादालोकाभाववत्॥ नचभावत्वे
तमसि च त्वापि स्पर्शानुभवाभावात्

23

मितभा

आलोकाभावेपि व्याप्तिग्रहात्

षिघटाद्यभाववत्॥ आलोकनिरपेक्षचक्षुर्ग्राह्यत्वेन स्यादिति चेत्॥ नौ अ
भावग्रहे प्रतियोगिसत्त्वस्यानपेक्षितत्वात्। प्रतियोगिनि सति तदभावाग्र
हात्॥ एवं तत्र न स्यान्नहि घटे सति तदभावो गृह्यते॥ अतः आलोकस्यांधकारप्र
तियोगित्वात् तदभावोपि तमसश्चाक्षुषत्वं न दोषाय। आरूपं तु इद्रनिलादिगतं स्म
र्यमाणमारोप्यते॥ शुक्लत्वाभाववत्त्वारोपे साहचर्यं॥ क्रिया च दीपादिगता गृ
ह्यमाण आरोप्यते ततस्ताभ्यां न द्रव्यसाधनसिद्धिरिति। ननु शक्तिः पदार्थां
तरं॥ तत्र प्रमाणं॥ अयं वह्निः दाहानुकूलातींद्रिया[illegible]धर्मसमवायी। दाह
जनकत्वात् यदेवं तदेवं यथास्मान च साध्यवैकल्यं दृष्टांतस्य। एवंविधस्या
दृष्टस्य तत्र समवायात्॥ स्थितस्थापकोष्णस्पर्शात्मादिसंयोगैः सिद्धसाध
नतावारणाय दाहानुकूलेत्यादि॥ अतींद्रियप्रतिबंधकाभावेन सिद्ध
साधनतावारणाय समवायीति एवं मानसिद्धा शक्तिः॥ कुतो नोदिष्टा

॥२२॥

षि

॥२२

इत्यत आह॥ शक्तिरिति। वह्न्यादिकारणस्वरूपमेव न पदार्थांतरमित्यर्थः। अ
नुमाने चात्मत्वमुपाधिः॥ नन्वघटं भूतलमिति विशिष्टज्ञानं॥ विशेषणविशेष्य
संबंधजन्यं विशिष्टज्ञानत्वात् दंडीति ज्ञानवत्॥ इति परिशेषात् संबंधत्वेन वैशि
ष्ट्यसिद्धिः॥ तत्तु तानोक्तमित्यत आह॥ विशिष्टमिति अघटं भूतलमित्यत्रापि
स्वरूपसंबंधस्य विद्यमानत्वात् नैव सिद्धसाधनमित्यर्थः। तत्रापि संबंध एव
विशिष्टबुद्धिहेतुर्न तु विशेषणादयः सर्वेपि तथा सति प्रत्येकं विशिष्टबुद्धिप्र
संगादिति॥ ननु ज्ञातो घट इत्यादौ ज्ञानजन्यघटादिविषयनिष्ठं ज्ञाततारव्य
पदार्थांतरमस्तीत्युक्तव्याप्तिमित्याह॥ ज्ञाततेति। ज्ञानविषययोः संबंध एव ज्ञात
ताद[illegible]तिरिक्तत्वे मानाभावादित्यर्थः। ननु गोसदृशो गवय इत्यादौ सादृश्य
[illegible] तरमस्ति तदुदेष्टव्याप्ति. आह सादृश्यमिति॥ गोसादृश्यं गोगतम
गित्वादिगवयवगततत औपाधिकं सामान्यं तदुदिष्टमित्यर्थः॥ लघुत्वपदा

मर्या २

मु॰
म

५२

24

मितभ

शं२णा१

षि

थीतरमत आह। छबुत्वमिति॥ नन्वन्ये [illegible] त्रमा [illegible] दयः पदार्थाः संति ते कुतो नोक्ता
इत्यत आह॥ एवमिति। तेषामपि बुधिद्व्यादौ यथा यथ्यं मतर्भावइति नाधिक्य
मित्यर्थः॥ नन्वेवमंतर्भावेपसिधांत इति अर्केयास्त्र च कृतोपि सं [illegible] मत इत्याह॥ ह
[illegible] येति॥ गुणागणनायां रूप [illegible] रसगंधस्पर्शाः संख्यापरिमाणानीति सं
यर्थ ख्यांगुणेंतर्भावस्तु च कृतोक्तः। तद्वदपरेषामपीत्यर्थः॥ करणत्व कार्यत्वा
या. भ्यां विभागांतरमाह। एतेष्विति। नित्यानामाकाशादीनां अनित्यानां घ
णुकादीनां॥ कारणं विभजते तच्चेति॥ तच्च कारणं त्रिविधं त्रिप्रकारं क
॥२४॥ मित्यर्थः। समवायिकारणं तंत्वादि असमवायिकारणं तत्संयोगादि नि
मित्तं कुविंदादि॥ ननु मनसा सह पृथिव्यादिचतुष्टयमूर्तं अन्यत्सर्वं म ॥२४
मूम [illegible]र्तं तेषामेव पंचानां क्रियावत्वं मन्येषां निष्क्रियत्वमित्यादयो भेदाः कथं नोक्ता
इत्यत आह॥ अपर इति॥ एवं द्रव्यगुणकर्मसामान्यविशेषसमवायानां

पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्वज्ञानं निःश्रेयसहेतुरिति सूत्रोक्तपदा
र्थानुद्दिश्य तच्छेषं व्याकरोति॥ एतेषामिति॥ उक्तानां पदार्थानामित्यर्थः॥ तत्वप
दस्य रूढमर्थमाह तत्वमिति॥ आरोपिते शुक्तिरजतादावतिव्याप्तिवारणायाना
रोपितमिति विशेषणं॥ तस्यारोपितत्वान्नातिव्याप्तिः। ज्ञानपदस्यानुभवपर
तामाह तस्येति॥ तदवांतरभेदमाह स चेति॥ सः अनुभव इत्यर्थः॥ श्रुतिस्मृ
तीतिहासपुराणेषु शब्दतात्पर्यावधारणं श्रवणं॥ असंभावनाविपरीतभावना
निरासेन युक्तिभिरनुचिंतनं मननं॥ श्रुतस्य मतस्य तथैव ध्यानं निदि
ध्यासनं॥ इदंतया अहंतया वा इदमित्थमेवेति अपरोक्षज्ञानं साक्षात्का
रः एतल्लक्षणं स्वरूपं यस्यानुभवस्य स तथा॥ निःश्रेयसपदार्थमाह निःश्रे
सः पुनरिति॥ समस्तानां दुःखानामभावः तस्य मिथ्याज्ञानस्य कार्याणि॥
तत्कार्याणीति दुःखविशेषणं॥ मिथ्याज्ञानं च तदेव कारणं चेति मिथ्याज्ञा

खार

25

मुक्तिभा

षि

न कारणं तस्य प्रध्वंसस्तेन समानमधिकरणमाश्रयो यस्य तत्कार्य्यं समस्तदुःखा
भावस्य स तथा तत्त्वज्ञानेनोत्पाद्यश्चासौ मिथ्याज्ञानकारणप्रध्वंससमानाधि
तर्क करण[illegible]त्कार्य्यं समस्तदुःखाभावश्चेति कर्म्मधारयः॥ तच्च तत्त्वज्ञानोत्पा
द्यसमस्तदुःखाभाव इति निःश्रेयसपदार्थनिरूपणं॥ इतरत्तु समस्तदुःखा
भावसामग्रीकथनपरं॥ घटाभावस्य मोक्षत्ववारणाय दुःखस्येति पदं॥ अहि
कंटकादिजनितदुःखाभावस्य सुषुप्तौ वर्त्तमानदुःखाभावस्य च [illegible] मोक्षत्वं
॥२५॥ माभूदिति समस्तेति॥ एवमपि वक्ष्यमाणशरीरादिसमस्तदुःखाभावो विद्यते प्रळ
य इति तद्वारणाय तच्च ज्ञानोत्पाद्येति प्रळये तु शरीरादेरभावोऽदृष्टादिनिमि
त्तेन न तत्त्वज्ञानोत्पाद्य इति नातिव्याप्तिः॥ ननु तत्त्वज्ञानस्य समस्तदुःखाभा ॥२५॥
वोत्पादने किं द्वारमत आह मिथ्याज्ञानकारणप्रध्वंसेति॥ तत्त्वज्ञानेन दुः
खाभावजननीये मिथ्याज्ञानप्रध्वंसोऽवांतरव्यापार इत्यर्थः॥ कार्य्यकार

यथा अपेक्षाबुद्धिनाशोपरत्वापरत्वयोर्नाशाइति।२

पापक्षाभ्यां मिथ्याज्ञानकारणप्रध्वंसतत्कार्यस्य दुःखस्यावश्यं ध्वंसो भवतीति
दर्शयति। देवदत्तमिथ्याज्ञानध्वंसेपि यज्ञदत्तसमस्तदुःखाभावो नास्तीति समा
नाधिकरणेत्युक्तं। यस्मिन्नात्मनि समस्तमिथ्याज्ञानध्वंसस्तस्मिन्नेव समस्त
दुःखाभाव इत्यर्थः॥ ननु कोयं समस्तदुःखभावः किं प्रागभावः उत प्रध्वंसाभा
वः उतान्योन्याभावः किं वात्यंताभावः॥ नाद्यं तौ तयोरनुत्पत्तेरपुरुषार्थत्वा
त्पुरुषकृत्युत्पाद्यो हि पुरुषार्थः॥ प्रागभावात्यंताभावयोरनादित्वेनातुल
किंच घत्वात्॥ दुःखात्यंताभावस्य समस्तदुःखप्रागभावस्य चात्मन्यसंभवात्॥ ब
हूनां दुःखानां तत्र निष्पन्नत्वात्॥ नापि तदन्योन्याभावो मोक्षः॥ संसारदशा
यामपि दुःखमात्मा न भवतीति तदन्योन्याभावसंभवेन मुक्तत्वप्रसंगात्॥
नापि दुःखध्वंसो मोक्षः॥ समस्तशब्देन शरीरादेर्विवक्षितत्वात्॥ तस्य चा
तीतस्य स्वत एव ध्वंस्तत्वेन तत्वज्ञानानपेक्षणात् वर्तमानस्य च पूर्ववत्तत्कार

॥ आगामिशरीरादिरनुत्पन्नत्वेन ध्वंसासंभवात्

णादेव प्रध्वंससंभवात्॥ आगामिशरीरादिकमुत्पाद्य तद्ध्वंसे तत्त्वज्ञानस्यापि दुःखजनकत्वप्रसंगात्॥ तस्मात्समस्तदुःखाभावो मोक्षोऽनुपपन्न इति चेत्॥ अत्रोच्यते॥ आगामिशरीराद्यनुत्पादरूपदुःखप्रागभाव एव मोक्षः। तत्त्वज्ञाने हि सत्यागामिशरीरादिकं नोत्पद्यते॥ न च तस्यानुत्पाद्यत्वेनापुरुषार्थत्वं॥ प्रायश्चित्तादिसाध्यदुःखानुत्पादवत्तस्यापि परिपालनसंभवात्॥ तत्त्वज्ञाने सति दुःखकारणमिथ्याज्ञानादिध्वंसात् प्रागभावस्योत्तरकालसंबंधरूपपरिपालनं भवति। तत्त्वज्ञानाभावे दुःखकारणेन प्रागभावनाशात् दुःखोत्पत्तिरेव भवति। अतोन्वयव्यतिरेकाभ्यां प्रागभावपरिपालनं ध्यमिति नापुरुषार्थत्वं॥ न च समस्तदुःखप्रागभावासंभवः। समस्तपदेन शरीराद्येकविंशतिप्रकारस्य विवक्षितत्वात्॥ तस्य चागामिनः पूर्वमजातत्वेन प्रागभावसंभवात्॥ न च प्रागभावस्य प्रतियोगिजनकतानियमान्मुक्तस्य संसारिताप्रसंग इति वाच्यं मोक्षशास्त्रविरोधात् मोक्षरूपप्रागभावव्यतिरिक्तप्रागभावे प्रतियो

रूपसाध्यत्वं

स२ ॰ चरमशरीरादिकं तत्त्वज्ञाने सति संचितकर्मक्षयाय भोगार्थं योगज
सामर्थ्यगृहीतशरीरमध्येयं इति मशरीरं तदेव ॥४

गिजनकत्वनियमस्य संकोचनात् तदन्यथा प्रायश्चित्तविधेरपि वैयर्थ्या
पत्तेः तद्विनाश्यपापजन्यदुःखप्रागभावस्यापि प्रतियोगिजनकत्वनिय
मात् मोक्षशास्त्रं नेपु[illegible]रावर्त्तते इमं मानवमावर्त्तनावर्त्तते इति न्यायश्चा
चरमशरीरादिदुःखध्वंसो मोक्षः [illegible]
त[illegible] । ननु तत्त्वज्ञानं विनापि वर्त्तमानस्वशरीरादि
ध्वंसः पूर्ववत्संभवतीति चेत् ॥ न ॥ तदा तस्य चरमत्वाभावात् चरमदुः
ध्वंसस्यान्वयव्यतिरेकाभ्यां तत्त्वज्ञानजन्यएव ॥ तथाहि ॥ तत्त्वज्ञाने नहि
स मिथ्याज्ञानध्वंसेतितन्मूलरागद्वेषयोरभावात् तदधीनधर्माधर्मसा
धनेप्रवृत्त्याद्यभावेन त[illegible]हेतुकाग्रेतनजन्मादेरभावात्तन्निमित्तदुःख
स्याप्यभावः ॥ तथा च तदेव तत्त्वज्ञानसमानकालीनं शरीरादिकं च
अथवा यच्छरीरे तत्त्वज्ञानमुत्पन्नं तदेव शरीरादिकं चरमं इतरेषां स्वयुक्तादित्वेनभो
गार्थं चरमत्वाभावात् ॥१०

27

चरमं॥ एवं च तत्त्वज्ञानाभावादस्मदादेश्चरमदुःखध्वंसो नाद्याप्यजनि येषां च शुकादीनां शरीराद्यनात्मव्यतिरिक्तआत्मेति एवं साक्षात्काररूपः तत्त्वावबोधः समभूत्॥ तेषां चरमदुःखध्वंसोप्यजनिष्टेत्यन्वयव्यतिरेकाभ्यां तस्य कारणता सिध्यति॥ अतो नात्र कश्चिद्दोषः। मोक्षसाधनं च ज्ञानमेव। ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यत इति वचनात्॥ न तु कर्मनैवाज्ञानकर्मसमुच्चयः कर्मणो मिथ्याज्ञाननाशकत्वादर्शनात् तन्नाशमंतरेण मोक्षासंभवात्॥ तत्त्वज्ञानस्य च रज्जुसर्पभ्रमादौ मिथ्याज्ञाननाशकत्वदर्शनात्॥ नहि तत्रानिकदीपसर्पणादिक्रियावतोपि रज्जुतत्त्वज्ञानं विना सर्पभ्रमो निवर्त्तेत इति सर्वमवदातं॥ छ ॥७॥ ॥ किं तत्समस्तदुःखयस्याभावो मोक्षो तत्राह। दुःखं चिति। चारीरं

प्रसिद्धं षडिंद्रियाणि घ्राणरसनत्वचक्षुःश्रोत्रत्वग्मनांसि तद्ग्राह्या विषयाः षड् गंधरसरूपशब्दस्पर्शसुखादीनि तत्तज्ज्ञानानि षड्बुद्धयः सुखं दुःखं च प्रसिद्धं ॥ तत्र शरीरादीनां दुःखसाधनत्वात् ॥ सुखस्य दुःखसंभिन्नत्वात् दुःखत्वं दुःखं तु मुख्यमेव दुःखमिति विवेकः ॥

॥ ८॥ ॥ श्री ॥ ॥ ॥ या माधवसरस्वत्या रचिता मितभाषिणी ॥ तत्रोपदेशप्रकरणं व्याख्यागोचरतामियात् ॥८॥ ८॥ ११८ श्री ॥ ॥ एवं सूत्रशेषं व्याख्यायेदानीमुत्तरग्रंथसंगतिमाह ॥ इदानीमिति ॥ एवकारेणापरीक्षाव्युदासः लक्षणमेवोच्यत इत्यत्र हेतुमाह लक्षणेति । लक्षणेन विना पदार्थानामितरेतरव्यावृत्तिव्यवहाररूपतत्त्वज्ञानस्यासंभवात् । आत्मानात्म । विवेकाभावात् तदर्थं लक्षणत्वमेवोच्यत इत्यर्थः ॥

28

लक्षणमेवाधीनेनिमित्तं यस्य तस्य भावस्तत्त्वं तस्मादिति विग्रहः॥ लक्षणज्ञानाय तल्लक्षणमाह॥ तत्रेति॥ ननैवमनवस्था तस्य तस्य लक्षणस्य लक्षणांतराभिधानादिति वाच्यं॥ इदमेवैकं लक्षणं सर्वस्यापि लक्षणस्य ज्ञानं कुर्वत् स्वस्यापि लक्षणत्वेन सर्वांतःपातात्स्वज्ञानमपि जनयति स्वाधाय प्रमेयादिपदवत् न तु स्वज्ञानाय लक्षणांतरमपेक्षते येनानवस्था स्यात् त द्यात्माश्रय इति चेत् न। अव्यवधानेन स्वेनैव स्वज्ञानमात्माश्रयः। अत्र सर्वलक्षणद्वारा स्वस्यापि ज्ञानं जनयतीति व्यवधानान्न दोषः॥ तस्माल्लक्षणज्ञानाय लक्षणं वाच्यमिति तदुच्यते तत्र लक्षणानीमध्य इत्यर्थः॥ विशेषपदार्थेति व्याप्तिवारणाय हेत्वेति अन्वयिनि तद्वारणाय व्यतिरेकीति अन्वयव्यतिरेकिणि तद्वारणाय केवलेति। जीवच्छरीरं सात्मकं प्राणादिमत्त्वादित्यादौ तद्वारणाय विशेषपदं॥

नलुर तुरार

केवलव्यतिरेकिहेतो दिनाबा[illegible]स्यादौ तद्वारणाय [illegible] विशेषणं व
मसाधारणधर्मवचनत्वं केवलव्यतिरेकी चावयवोपपन्नः लक्षणस्य
तदभावात्। कथं तत्वमित्याशंक्यानुमानं रचयति।प्रयोगस्त्विति। लक्ष
णपक्षः इतरेभ्यो भिद्यत इति साध्यं लक्षणव्यतिरिक्तसकलप्रतियो
गिकान्योन्याभाववदित्यर्थः॥ व्यतिरेकव्याप्तिमाह॥ यदिति॥ धूमव
त्वस्येत[illegible]रमध्येपातित्वालक्षणनिष्ठभेदप्रतियोगित्वं न तु भेदाधार
त्वं अत इतरेभ्यो न भिद्यत इति साध्यभेदो नास्ति हेत्वभावोप्यस्तीति
व्यतिरेकदृष्टान्तत्वं धूमवत्वस्य व्यतिरेकव्याप्तिः हेतोपक्षनिष्ठत्वलक्ष
णं व्यतिरेकोपनयमाह। न च तथेदमिति किंतु भवत्येवेत्यर्थः प्रतिज्ञाता
र्थं विपरीतनिरासकफलं निगमनमाह॥ तस्मादिति हेतुमत्वादि

त५

29

मित

कर

त्यर्थः। सर्वेषु लक्षणेष्वितरभेदसाधनप्रकार एवमेवेत्यतिदिशतीति॥ एव
मिति। यस्य यल्लक्षणं तमेव हेतुं विधाय लक्ष्यमेव पक्षं [illegible] वा इतरभेद
साधनं व्यतिरेकिणा कर्त्तव्यमित्यर्थः॥७॥७॥७॥ ॥७॥॥ सामान्यलक्ष
णं विना विशेषलक्षणासंभवमात्रां क्योक्तेः स्मारयति। तत्रेति। तत्रैल
क्षणे वक्तव्ये सति सामान्यलक्षणं कृतमित्यर्थः॥ यद्यपि प्रमिति वि
षयत्वं न पदार्थसामान्यलक्षणं तस्य केवलान्वयित्वेन केवलव्यतिरेकी हे
तु विशेषरूपत्वाभावात् तथापि लक्षणशब्देनात्र पदार्थमात्रवृत्तिधर्मो गौ
ण्यावृत्त्या विवक्षितः॥ गुणत्वं तावन्मात्रवृत्तित्वं लक्षणं हि लक्ष्यमात्रवर्त्ति तत्प्र
मितिविषयत्वं मपि पदार्थमात्रेवर्त्तते अतो गुणयोगाल्लक्षणपदं पदार्थ
शब्दप्रवृत्तिनिमित्ते प्रमितिविषयत्वे वर्त्तते इति द्रष्टव्यं ग्रंथकारोक्त
स्यापि मुख्यत्वासंभवे गौणत्वमाश्रयणीयमेवेति लक्षणशब्दो गौणः
पदार्थमात्रवृत्तिधर्मपरो न केवलव्यतिरेकी हेतुरूपलक्षणपर इति॥

पृ
॥२८॥

भा

नां

॥२८

प्रयुक्तो त्रेति द्रष्टव्यं॥ ॥७॥ ॥ ॥ द्रव्यादीनां क्रमेण लक्षणान्याह द्रव्यत्वे-
त्यादिना। सामान्ययोगित्वं गुणादावतिव्यापकमिति द्रव्यत्वेति। ननु द्र-
व्यत्वभावारूपं नास्त्येव। अद्रव्यापोहे नैव सकलद्रव्यानुगतेन द्रव्य-
मिति व्यवहारोपपत्तेरिति वदतां बौद्धं निराकर्तुं सामान्यपदं अयमा-
शयो द्रव्यापोहस्य द्रव्यनिरूप्यत्वात्प्रथमं द्रव्यव्यवहारो वक्तव्यः। स चा-
नुगतद्रव्यत्वसामान्यं विना न संभवतीति तत्प्रथममभ्युपेयं। अन्य-
था द्रव्यत्वे ज्ञाते तदपोहे नद्रव्यानुगतव्यवहारः द्रव्यव्यवहारे च सति
द्रव्यनिरूप्याद्रव्यज्ञानमितीतरेतराश्रयप्रसंग इति॥ एतत्सर्वं समा-
नानां भावः॥ सामान्यमिति पदव्यक्तस्यैव सूचितं॥ एवंग्रेपि सामा- म२
न्यपदमपोहवादिनिरासायेति द्रष्टव्यं॥ तदपि सामान्यपदं जातिपरं ते-
न द्रव्यत्वजातिर्नास्ति व्यंजकाभावादिति वदन्प्राभाकरो निरस्तो वेदि-

सास्नादिमत्व २

तव्य इति सूचयन्द्रव्यत्वजातेर्व्यंजकमाह ॥ गुणवत्समवायिकार
णं चेतीति जात्यनाधारान्यावृत्तस्तदाधारगतो धर्मो व्यंजकः ॥ यथा गो
त्वस्य व्यंजकं यत्र यत्र गुणवत्त्वं तत्र तत्र द्रव्यत्वमिति रूपदेशसहकृतेन ग्र
स्यद्वैणरत्नं तत्ववत्तद्रव्यत्वं जतीयत इत्यर्थः ॥ यद्वा एतदपि लक्षणद्वयमे
वं न चोत्पन्नद्रव्ये क्षणमात्रं गुणरहिते गुणवत्त्वमव्यापकमिति वाच्यं ॥ कदा
चिद्गुणवत्त्वस्य लक्षणत्वात् यद्वा गुणात्यंताभावविरोधिमत्त्वं गुणवत्त्वं
विवक्षितं गुणात्यंताभावविरोधिना च गुणतत्प्रागभावप्रध्वंसाभा
वा तद्वत्त्वं लक्षणार्थः ॥ तथा चोत्पत्तिसमवायेपि गुणप्रागभावोस्तीति
तो नाव्याप्तिरित्यर्थः । एवं समवायिकारणेपि द्रष्टव्यं ॥ न चातिव्यापक
मुभयगुणादौ तदुभयाभावात् ॥ ॥०॥७॥७॥ गुणत्वजातेर्व्यंजक
माह जातिमत्वेति । जातिमदचलनासमकासमवायिकारणत्वं गुणा

ल

मितभा

णायनित्येतिगगनादौतद्वारणायसंबंधइति। नचात्माकाशसंयोगेति
व्याप्तिस्तस्यनित्यत्वादितिवाच्यं॥ अन्यतरकर्मोभयकर्मणोस्तत्का
रणयोरात्माकाशादावभावेनतयोःसंयोगाभावात्। तस्यनित्य
त्वसमानाभावात् [illegible]ड्व्यत्वेनसंयोगसाधनेविभागेतेनैवसिद्ध्येत् तथा
चकुतःसंयोगस्यनित्यत्वमिति॥७॥७॥ ॥अभावत्वव्ययतिप्रतियोगीति स्वा
भावविरहात्माप्रतियोगीप्रतियोगिज्ञानाधीनज्ञानंयस्यसतथाअधीन
त्वजन्यत्वंज्ञानाधीनज्ञानोऽभावः इत्यत्रसमवायेति व्याप्तिः तस्यापिसं
बंधिज्ञानाधीनत्वात्॥ अतत्रकेप्रतियोगीति॥ संबंधिनश्चसमवाये
विरहत्वाभावान्नप्रतियोगित्वंकिंतुसंबंधित्वमात्रं॥७॥७॥ ॥इदानी
मवांतरविभागानुक्रमेणलक्षणान्याह पृथिवीत्वेत्यादिनापृथिवीत्वजा
तिमात्रव्यंजकमोहगंधवतीतिगंधवत्त्वंपृथिवीत्वस्यव्यंजकमि[illegible]

बे३

॥३१॥

मि

॥३

मितभा

कारणत्वं कर्मभवव्यञ्जकमित्यर्थः॥ वस्त्वर्थः व्यञ्जकाभावश्चे कानिरासा
य यद्वा लक्षणान्तरं चः समुच्चयार्थः॥ कारणमात्रमदृष्टादावतिव्या[illegible]
तो असमवायीति एवं च रूपादौ रूपादेरपि तन्त्वादिगतस्य पटादिगतरू
पादिकं प्रत्यसमवायिकारणत्वात्॥ अतः संयोगविभागेति एवं च संयोग
विभागयोरिति प्रसंगस्तयोरपि संयोगजविभागजौ प्रत्यसमवायिकारणत्वा
दत आद्येति आद्य संयोगविभाग कारणत्वं तद्द्वारा द्रव्येप्यस्तीति तद्वा
रणायासमवायीति॥ कारणपदं स्पष्टार्थं॥७॥७॥ सामान्यादिषु जात्य
भावान्न जातिगर्भलक्षणमित्येकैकमेव लक्षणं तत्र सामान्यं लक्षयति
॥ नित्यमिति। समवेतमित्येकैके रूपादावतिव्याप्ति[illegible]रत आह॥ अनेके
ति एतौत्येकैके संयोगेति व्याप्तिः॥ अतउक्तं नित्येति नित्यमनेकसम
वेतं सामान्यमित्येकैके अ[illegible]नेकेषां निरोषमनेकसमवेतत्वं नित्य

॥३१॥

षि

पिः

॥३

व२

त्वं वास्त्वाति तत्रातिव्याप्तिवारणायैकमिति केचित् ॥ तदपरे न सहंते ॥
नित्यमनेकसमवेतमित्येतावतैव विशेषेषतिव्याप्तिनिरासः प्रत्येकं ते
षु तदभावात् ॥ अतः स्वरूपकथनायैवैकमिति यद्वा इदमेकं लक्षणम्
इत्येकशब्देनोच्यते लक्षणांतरं तु स्वयमूह्य हस्तुभावत्वे सति सम
वेतं विशेषान्यन्निःसामान्यं सामान्यमिति ॥ ॥ ६ ॥ ६ ॥ ७ ॥ ८ ॥ ॥ विशे
षलक्षणे एकव्यक्तिरिस्फटेरसादावतिव्याप्तिवारणाय सामान्य
रहित इति समवायादौ तद्वारणाय एकद्रव्यंवृत्तिरिति नन्वनेकव्य
क्तिवृत्तेरपि सामान्यस्यैकव्यक्तिवृत्तिमस्यैवेति तत्रातिव्याप्तिरिति
चेत् ॥ सत्यं ॥ एकव्यक्तिमात्रनिष्ठत्वस्य तत्समवेतत्वस्य विवक्षित
त्वान्न दोषः ॥ ॥ ७ ॥ ॥ ८ ॥ समवायलक्षणे संयोगतिव्याप्तिवार

णायनित्येति गगनादौ तद्वारणाय संबंध इति। न चात्माकाशसंयोगेति
व्याप्तिस्तस्य नित्यत्वादिति वाच्यं॥ अन्यतरकर्मोभयकर्मणोः स्वाका
रणयोरात्मा[illegible]काशादावभावेन तयोः संयोगाभावात्। तस्य नित्य
त्वे समानाभावात् [illegible]द्रव्यत्वेन संयोगसाधने विभागेतेनैव सिद्ध्येत् तथा
त्वकृतः संयोगस्य नित्यत्वमिति॥७॥७॥ ॥ अभावत्वव्ययतिप्रतियोगीति स्वा
भावविरहात्मा प्रतियोगी प्रतियोगिज्ञानाधीनज्ञानं यस्य स तथा अधीन
त्वं जन्यत्वं ज्ञानाधीनज्ञानो अभावः इत्यके समवायेति व्याप्तिः तस्यापि सं
बंधिज्ञानाधीनत्वात्॥ अतत्रके प्रतियोगीति॥ संबंधिनश्च स[illegible]मवाये
विरहत्याऽभावान्न प्रतियोगित्वं किंतु संबंधित्वमात्रं॥७॥७॥ ॥ इदानीं
मवांतरविभागानुक्रमेणऽत्रणान्यांह पृथिवीत्वेत्यादिना पृथिवीत्वजा
तिमात्रव्यंजकमाह गंधवतीति गंधवत्वं पृथि[illegible]वीत्वस्य व्यंजकमि[illegible]

॥३३॥

ब३

त्यर्थः ॥ यद्वा लक्षणांतरं ननु मणिवज्रादावव्याप्तिः तत्रापि पाकजरूपे
ण गंधवत्वानुमानात् । यद्वा वज्रादिभस्मनि गंधवत्वोपलंभात् तत्परमा
णुषु गंधवत्वमनुमीयते त एव च वज्राद्यारंभका इति तत्रापि गंधवत्व
सिद्धिः ॥ न च जलादावतिव्याप्तिः तत्र गंधवत्वस्य चंपकादिपार्थिवोपाधिनि
मित्तत्वात् ॥ ॥७॥ ॥ अप्त्वव्यंजकमाह शीतस्पर्श इति शीतस्पर्शो न लम
प्तु व्यंजक [illegible] मित्यर्थः । यद्वा लक्ष
णांतरं तत्र स्पर्शत्वं पृथिव्यादावव्यापकं । अत उक्तं शीतेति शीताअ
प्स्वेकसामानाधिकरण्यात् । गुणगुणिनोरभेदभ्रमः स्यात् । तद्वार
णाय स्पर्शेति एवं च शीतस्पर्शो यासामिति बहुव्रीहिणा भेदप्रतीते
र्नाभेदभ्रमो भवतीति । न च चंद्रेतिव्याप्तिः तत्र हि चंद्रमंडलारंभकावयवेनो
पष्टंभकजलं तद्वगतं शैत्यं संयुक्तसमवायात् प्रतीयते न तु स्वाभा

विकं शैत्यं ।। न चोष्णोदके व्याप्तिः तत्रापि वह्निस्पर्शेन तस्याभिभवात् बलवत्सजातीयसंबंधस्याभिभावकत्वात् ।। ।।०।। ।। एवं तेजोलक्षणेपि द्रष्टव्यं ।। न च तेजोलक्षणे चंद्रसुवर्णादावव्यापकं चंद्रे उग[illegible]लस्पर्शाभिभतस्य सुवर्णादौ तु पार्थिवस्पर्शाभिभूतस्योष्णस्पर्शस्य सत्वात् ।। ।।७।। वायुत्वव्यंजकमाह ।। अरूपेति अरूपस्पर्शवत्वं व्यंजकमित्यर्थः । यद्वा लक्षणांतरं । तत्र स्पर्शवत्वं तेजःप्रभृतिष्वतिव्याप्तमतो रूपेति । अरूपत्वमाकाशादावतिव्याप्तमित्यत आह ।। स्पर्शवानिति ।।०।। ।। आकाशादिचयस्य ज्ञातेरभावादेकैकमेव लक्षणमाह ।। शब्देति ।। आत्मादावतिव्याप्तिवारणाय शब्देति शब्दवदित्युक्ते न कोपि दोषः ।। तथापि तस्य भाट्टसिद्धद्रव्यत्वनिरासेन गुणत्वसूचनाय गुणपदं ।। शब्दो गुणः ।। बहिरिन्द्रियव्यवस्थाहेतुत्वात् रूपवदिति शब्दस्य गुणत्वसिद्धिरित्यर्थः ।।७ ।। आदित्यपरिवर्त्तनं सूर्यपरिस्पंदः ।। तेन ग[illegible]स्पाद्येयेपरत्वापरत्वेत

योरसवायिकारणं काष्ठपिंडसंयोगः तदाधार इत्यर्थः ॥ अनधिकरणं
काष्ठ इत्युक्ते असंभवः काष्ठस्यापिड्व्यत्वाधिकरणत्वात् यद्वा घटत्वान
धिकरणे पटेतिव्याप्तिः तत उक्तेपरत्वापत्वेति तयोः पिंडनिष्ठत्वेन काष्ठ
स्य तदनधिकरणत्वं एतावदुक्ते समवायेतिव्याप्तिः तत आधार इ
ति एवं च कर्मण्यतिव्याप्तिः तदर्थं कारणेति तथाप्यनिवृत्तिस्तत्स्या
प्तिज्ञानकारणं [illegible] कर्मत्वाधारत्वात्"तत्तो असमवायीति कर्मणस्तु क
र्मत्वाधारत्वेप्य समवायिकारणाधारत्वाभावान्न दोषः ॥ असमवायी
त्याद्युक्ते गगनादावतिव्याप्तिस्तत उक्तेपरत्वेति एतावदुक्ते [illegible]वदि
त्री । तत उक्तं आदित्येति आधारां तपिंडेति व्यापकं अतोगेतनं परत्वे
त्यादि ॥ एतच्चापरत्वगर्भितमपरत्वगर्भितं लक्षणद्वयं द्रष्टव्यं एवं
दिग्लक्षणमपि ज्ञेयं ॥ एतावांस्तु विशेषः काष्ठेति व्याप्तिवारणाय आ

मितभा
वृत्या

दित्यसंयोगानुत्पाद्येति॥ ॥०॥०॥आत्मानं लक्षयति॥ आत्मेति॥ आत्मत्वत्या
त्मं इत्यत्यंताभावाप्रतियोगिद्रव्यवा[illegible]य जातिरात्मत्वं सामान्यं तद्योगीत्य
र्थः॥ आत्मत्वव्यंजकमाह। बुद्धीति बुद्धिर्गुणो यस्य तस्य भावस्तत्वं तच्चात्म
त्वव्यंजकमित्यर्थः॥ यद्वा लक्षणांतरं॥ तत्र गुण आत्मेत्युक्ते असंभवः गुण
वानात्मेत्युक्ते गगनादौ गच्छति तद्वारणाय बुद्धीति गुणेति स्पष्टार्थः॥
अथवा बुद्धिरात्मेत्यपि दृबौद्धबुद्धिसुद्धये गुणपदं॥ तथात्वे चात्मनो नि
त्यत्वप्रसंगादिति॥ यद्वा गुणवदिति। सामान्यलक्षणानुगतिद्योतना
॥३४॥ र्थं गुणपदं॥०॥०॥श्रीः॥ ॥मनसो लक्षणमाह॥ मनस्त्विति। गगना ॥३४
वृत्तिस्पर्शवत्वात्यंताभावाधिकरणक्रियावद्वृत्तिजातिर्मनस्त्वं॥ त
द्योगीत्यर्थः मनस्त्वव्यंजकमाह॥ स्पर्शेति। स्पर्शशून्यत्वे सति कर्माधार
रत्वं मनस्त्वव्यंजकमित्यर्थः॥ यद्वा लक्षणांतरं॥ तत्र घटादिवारणाय स्पा

पि

र्शीति गगनादि व्युदासाय क्रियाधिकरणमिति क्रियाधिकरण
त्वं तु मनसो त्वादेव सिद्धं॥ अन्यथा मनसो विभुत्वे आत्मनोपि विभुत्वात्॥ ताभ्यास
पदार्थसंबंधात् युगपत् ज्ञानानि स्यूः बा ह्येंद्रियतद्विषयासंबंधान्नेति चे
त्तात हिं तत्तद्विषयेंद्रियाणां युगपत्संबंधे ज्ञानयौगपद्यापत्तिः। इष्टमेवैतदी
र्घेलातत्रा शष्कुलीभक्षणादाविति चेत्॥ न व्यासंगस्थले क्रमदर्शनेन तत्रापि
क्रमानुमानाद्यौगपद्यप्रतीतिर्भ्रांतित्वात्। व्यासंगो नाम मनसोन्यासक्तत्वं
तत्र हि रूपादौ सकलविषयसंबंधेपि स्मग्रौषरूपेन्नाद्यासंगं धमत्वस्व
वस्य ज्ञानास्पर्शीति सर्वानुभवात् अणुत्वे तु येनेंद्रियेण मनः संबध्यते तेनैव
ज्ञानं जायते नान्येनेति॥ युक्तो यौगपद्याभावः अतः सिद्धं क्रियावत्त्वं मनसः॥
॥ गुणांतराद्भेदानां क्रमेण लक्षणानि दर्शयन्। रूपं लक्षयति रूपत्वेति॥
एकं लक्षणमेकं तु जातिव्यंजकमिष्यते॥ एवं सर्वत्र वि[illegible]ज्ञेयमप्यवाल

म

35

घ्राणांतरं।रसावृत्ति तैजसेंद्रियमात्रग्राह्यगुणवृत्तिजातिःरूपत्वं तद्यो।
गीत्यर्थः॥ळ घ्राणपदं गुणयुक्ते अतींद्रियधर्मादावतिव्याप्तिस्तद्वारणाय
ग्राह्येति।ग्राह्यो गुणो रूपमित्युक्ते रसादौ तत्तत्त्वकें चक्षुर्ग्राह्येति।एवमि
त्युक्ते संयोगादौ तत्तत्त्वके मात्रेति॥ ।७॥ ॥संयोगादौ द्वींद्रियग्राह्ये वा
न्ने चक्षुर्मात्रग्राह्यत्वं रूपत्वेप्रसंगवारणाय गुणेति संपूर्णमपि ळ घ्राण
प्रभाकुड्यसंयोगेति व्यापकं ततो विशेषगुणं इति ऽ द्रष्टव्यं॥ तथा च चक्षु
र्मात्रग्राह्यो विशेषगुणो रूपमित्यर्थः॥ यद्वा चक्षुर्मात्रग्राह्यजातिमान् गु
णो रूपमित्यर्थः॥ संयोगत्वस्य तथात्वान्न संयोगेति प्रसंगः॥ ॥७॥ ॥
रूपावृत्तिजळेंद्रियग्राह्यगुणवृत्तिजाती रसत्वं ळ घ्राणे तु रूपादौदावति
व्याप्तिवारणाय रसनेति रसनग्राह्य इत्युक्ते रसत्वेतिप्रसंगः। तद
र्थे गुण इति पार्थिवेंद्रियग्राह्यवृत्तिस्पर्शावृत्तिजातिर्गंधत्वं। ळ घ्रा

णो तु रसादावतिप्रसंगवारणाय घ्राणेति। गंधत्वजातौ तद्वारणाय गुणादिति
॥ स्पर्शं लक्षयति स्पर्शत्वेति। रूपत्वलक्षणकावच्छेदकावछिन्नप्रतियोगिताभावा
धिकरणविभुत्वानधिकरणद्रव्यवृत्तिविशेषगुणवृत्तिगुणत्वावांतरजा
तिः स्पर्शत्वं॥ जातिव्यंजकमाह स्पर्शनेति स्पर्शनमात्रग्राह्यगुणत्वं स्पर्श
त्वं व्यंजकमित्यर्थः॥ लक्षणपक्षे स्पर्शनग्राह्यो गुणः संयोगोपीति॥ तद्वा
रणाय मात्रेति॥ स्पर्शनमात्रग्राह्यत्वं स्पर्शजातावपीति। तदर्थं गुण
इति शेषपूर्ववत्॥ एतेषु चतुर्ष्वपि लक्षणेषु तत्तदिद्रियग्राह्यगुणत्वावा
तरजातिमत्त्वं निष्कृष्टोर्थः तेन परमाणुरूपादिषु नाव्याप्तिः चक्षुर्मात्रग्राह्य
गुणत्वावांतरजातिमद्रूपं॥ एवमुत्तरत्रापि द्रष्टव्यं॥ संख्यां लक्षयति संख्या
त्वेति गगनसमवेतसामान्यगुणवृत्तिद्वित्वगुणवृत्तिपरिमाणपृथ

मात्रा १

मितभा

त्कनिष्ठात्यंताभावप्रतियोगितावच्छेदकावच्छिन्नगुणत्वसाक्षाद्व्याप्यजा
तिः। संख्यात्वं जातिव्यंजकमाह गणनेति। कारणं संख्येत्युक्ते साधारणे
कारणेश्वरेच्छादौ प्रसंगः ततोऽसाधारणेति। एवमपि परिमाणादौ प्रसंगः।
ततो गणनेति पञ्चालीये सति पञ्चालीयं जायतेऽसति च न जायतेति
त्वस्यासाधारणं कारणं। यथा तंतुपटस्य। यथा वा कर्म संयोगादेः। तथा गण
नाजन्यसाधारणकारणं संख्या। ज्ञानं प्रति तु नासाधारणकारणं संख्या।
विनान्यस्मादपि घटादेर्ज्ञायमानत्वात्। संख्याज्ञानं प्रति संख्याया
असाधारणकारणत्वेपि तस्या गणनाप्रत्यसाधारणकारणत्वं न व्याह
न्यते।। ऽकेष्ठद्वणम्नत्वात् नहि घटस्य रूपादिचतुर्दशगुणानु।।
प्रति साधारणत्वेपि प्रत्येकमसाधारणत्वं व्याहन्यते। नहि घटः साधार
णकारणमिति व्यवहरंति तीर्थिकाः।। किंतु ईश्वरेच्छादीनासाधारण

॥३६॥

षिपं

॥३६

कारणत्वं। तेषां सदासत्वेपि तंत्वादिकं विना विशेषपटादिकार्यानुद
यात् तस्मात्स्वज्ञानं प्रति हेतुत्वेपि गणनासाधारणकारणत्वं संख्ये
ति सिद्धं॥ परिमाणं लक्षयति। परिमाणत्वेति। संख्यासमवायिकारणवृ
त्त्यपेक्षाबुद्ध्यसाधारणकारणाकावृत्तिगुणत्वसाक्षाद्व्याप्यजातिःपरिमा
णत्वं॥ जातिव्यंजकमाह॥ मानेति। माननियत्ता लक्षणपदे व्याख्याने पू
र्ववत्॥ पृथक्त्वं लक्षयति। पृथक्त्वेति। अपेक्षाबुद्ध्यसाधारणकारणके
समयवृत्तिगुणवृत्यत्यंताभावाप्रतियोगिसंख्यावृत्तिः जातिः पृथक्त्वं
तद्व्यंजकमाह॥ पृथक्त्वेति॥ पृथक्त्वव्यवहारर इदमस्मात्पृथगित्येवं
रूपः। संयोगं लक्षयति। संयोगत्वेति। द्रव्यासमवायिकारणगुण
वृत्यंताभावाप्रतियोगिगुणत्वावांतरजातिः संयोगत्वं॥ तद्व्यंजकमा
ह॥ अनित्य इति। लक्षणपक्षे समवायेति व्याप्तिवारणायनित्येदंपदं॥

मितभा

रूपादौ तद्वारणाय संबंधपदं॥ ॥७॥ ॥विभागं लक्षयति। विभागत्वेति। क्रि-
यासमवायिकारणकद्विष्ठगुणवृत्तिसंयोगावृत्तिगुणत्वसाक्षाद्व्याप्यजा-
तिर्विभागत्वं॥ विभक्तव्यवहारइदमस्माद्विभक्तमितिप्रत्ययव्यपदेशौ॥
परत्वापरत्वे लक्षयति। परत्वेति॥ अपरत्वगुणावृत्तिसकलपरत्ववृत्तिजा-
तिःपरत्वंपरत्वावृत्तिसकलापरत्ववृत्तिजातिरपरत्वं॥ परापरव्यवहारौ
त वृद्धतरुणादौ सन्नि कृष्टविप्रकृष्टयोश्च परापरप्रत्ययव्यपदेशौ॥ ल-
॥२७। क्षणपदव्यावृत्तिः पूर्ववत्॥ ॥७॥ बुद्धिं लक्षयति। बुद्धित्वेति सुखावृत्ति-
सकलबुद्धिवृत्तिजातिर्बुद्धित्वं॥ एवमुत्तरत्रापि जातय ऊह्याः॥ लक्षण-
पदे आत्माश्रयइत्युक्ते सुखादावतिव्याप्तिरतआह॥ प्रकाश इति। वक्ष्या-
दिप्रकाशे तद्वारणायात्माश्रयइति॥ ॥७॥ ॥श्री॥ सुखं लक्षयति सुखत्वेति
लक्षणपदे वेद्यं सुखमित्युक्ते दुःखतत्साधनादौ प्रसंगः॥ तदर्थम

षिण

त५

॥२

नुकूलेति ॥ एवं सति सुखसाधने प्रसंगः । तदर्थं निरूपाधीति । निरूपा
धित्वेमनन्यद्वारकत्वं सुखसाधनं तु सुखद्वारेणैवानुकूलमिति नातिव्या
प्तिः न हि चंदनं निंदाघे सुखसाधनमिति । हेमंतशिशिरयोः शीतार्त्तोप्यनु
लिप्यते ॥ ॥७॥ ॥ दुःखं लक्षयति दुःखत्वेति लक्षणपदे सुखादावतिव्या
प्तिवारणाय प्रतिकूलेति दुःखसाधने अहिकंटकादौ तद्वारणाय निरूपा
धीति दुःखसाधनं तु दुःखद्वारेणैव प्रतिकूलमिति नात्र प्रसंगः वि
षवैद्यैः सर्पादेपिगृह्यमाणत्वात्तु तेषां तस्य प्रीतिकूलत्वादर्शनादिति ।
इच्छां लक्षयति ॥ इच्छात्वेति ॥ अर्थयते प्रार्थयत इत्यर्थीं ग्रहादिलोकान् ॥
णिनिः ॥ तस्य भाव अर्थित्वं प्रार्थनेति यावत्तदेव लक्षणस्वरूपं यस्याः
सा तथा स्पष्टं ॥ ॥ छलयतीति छलनः स एव आत्मा स्वरूपं यस्य स तथा
क्रोधरूप इत्यर्थः ॥ प्रछलनात्मकत्वं यथा[illegible]तं वन्ध्यादावप्यस्तीति गुण
× यस्मिन्नसति आत्मा न प्रछलितमिव मन्यते स तथा ॥ २

मितभा

प्रकरणा...त्॥ गुणपदं संबंधनीयमिति नातिव्याप्तिः॥ यद्वा आत्मगुणप्रकरणत्वादात्मा अत्र इति संबंधनीयमिति॥ ॥७॥ ॥ प्रयत्नं लक्षयति। प्रयत्नत्वेति॥ अहं प्रयते अहं करोमीत्यादिव्यवहारः प्रयत्नव्यवहारः शेषं सुगमम्॥ ७८॥ गुरुत्वं लक्षयति गुरुत्वेति। लक्षणपदं कारणं गुरुत्वमित्युक्ते अदृष्टादावतिव्याप्तिस्तदर्थमसमवायीति एवमुक्ते संयोगादौ प्रसंगः तत्रुक्तं पतनेति। पतनं नाम अधःसंयोगफलिका क्रिया तस्याः असमवायिकारणमित्यर्थः॥ एतावदुक्ते नोदनाभिघातादिसंयोगे पतनेहेतावतिव्याप्तिः तत्रोक्तं॥ एकवृत्तीति। एकवृत्तित्वं रूपादावस्तीति इतिपतनेत्यादि। एकवृत्तिपतनकारणमित्युक्ते दुष्टादौ तत्तो समवायीति॥ ॥ द्रवत्वं लक्षयति द्रवत्वेति रूपवद्वृत्तिगगनावृत्त्येप प्रत्यक्षबुद्ध्यजन्यसामान्यगुणवृत्तिगुरुत्वान्यगुणाव्यावर्त्तजातिः द्रवत्वं॥ लक्षणपदं रूपादाव

तौ

॥३८॥

सि

स

॥३८

ति व्याप्तिवारणाय स्पंदनेति । स्पंदनं प्रस्रवणं एतावत्युक्ते संयोगादौ
तदर्थं एकवृत्तीति ॥ एकवृत्ति च तत्स्पंदनासमवायिकारणं चेति विग
हः ॥ ॥ स्नेहं लक्षयति ॥ स्नेहत्वेति लक्षणपक्षे द्रवत्वेति व्याप्तिवार
णाय द्रवत्वशून्य इति द्रवत्वजात्यनधिकरणमित्यर्थः ॥ द्रवत्वशून्य
मित्युक्ते रूपादौ प्रसंगः ततः संग्रहेति ॥ संग्रहो नाम चूर्णादेः पिंडीभा
वः ओदृष्टादावति व्याप्तिवारणाय साधारणेति ॥ ॥ संस्कारं लक्ष
यति ॥ संस्कारत्वेति । स्वस्य संस्कारस्यो स चौ द्रव्यस्य याऽवस्था
तस्या आपादकः । संस्कारो हि वेगो भावनास्थितस्थापकरूपस्त्रिवि
धोपि स्वोत्पत्तिसमयावस्थां द्रव्यस्य प्रतिपादयति तच्च वेगश्च लना
वस्था भावना ज्ञानित्वावस्थां स्थितस्थापको वैद्यानाद्यवस्थां प्रतिपाद
यतीत्यर्थः ॥ संस्कारोस्त्यवस्थापादकत्वं तदाधारद्रव्यस्याप्यस्तीति

तद्वारणायगुणइति ॥ गुणःसंस्कारइत्युक्तेपारिमांडल्येतिप्रसंगस्तदर्थ
मापादकइति ॥ उत्पादकत्वंकारणत्वंपारिमांडल्यंतुपरमाणुपरिमाणंतच्च
नकोंणमितिनदोषोभवतिएवमीत्युक्ते ॥ पटादिस्वरूपापादकेतंतुसंयो
गादावतिव्याप्तिस्तदर्थमवस्छेति ॥ एवमपिसंयुक्तेवावस्थापादकेसंयो
गेतिव्याप्तिस्तदर्थमुक्तंसच्चीति एवमपिरूपादावतिव्याप्तिरतस्चेति ॥ ध
र्मंलक्षयतिधर्मत्वेति ॥ लक्षणपक्षेअधर्मेतिव्याप्तिवारणायसुखेति ॥
सुखकारणंधर्मइत्युक्तेईश्वरा[illegible]दौतत्प्रसंगस्ततोसाधारणेति ॥ अ
धर्मंलक्षयति ॥ अ[illegible]धर्मत्वेति ॥ लक्षणपक्षेधर्मेतिव्याप्तिवारणायदुखे
ति ॥ आत्मादौवारणायासाधारणेति ॥ ७ ॥ ८ ॥ शब्दंलक्षयति ॥ शब्दत्वेतिग
गनवृत्तिविशेषगुणवृत्तिरूपावृत्तिजातिःशब्दत्वं ॥ लक्षणपक्षेसुखा
दावतिव्याप्तिवारणायश्रोत्रगाह्येति ॥ श्रोत्रग्राह्यत्वंशब्दत्वेपीतिगुणइ

तिगुणत्वे तु प्रमाणमुक्तमेव॥ ॥ ७१॥ ॥ ॥कर्मावांतरभेदानुल्लक्षयति।
उत्क्षेपणेति ऊर्द्ध्वसंयोगहेतुक्रियावृत्तिकर्मत्वावांतरजातिरुत्क्षेपणत्वं। एव
मुत्तरत्राप्यूह्यं॥ अपक्षेपणादावतिव्याप्तिवारणाय ऊर्द्ध्वदेशसंयोगेति।
कारणमित्युक्ते उत्क्षेपणाधारद्रव्येतिव्याप्तिरतः । कर्मेति अपक्षेपणे
ति उत्क्षेपणेतिव्याप्तिवारणायाधोदेशसंयोगेति शेषं पूर्ववत् विन
म्रपदवस्त्रद्व्यागतकर्मण्यनाकुंचनेतिव्याप्तिवारणायापादकमिति॥
अपक्षेपणादौ तद्वारणाय वक्रत्वेति आकुंचनाधारे तद्वारणाय कर्मेति
इतरत्र कर्मण्यतिव्याप्तिवारणाय ऋजुत्वेति शेषं पूर्ववत् अन्यत्र कर्म
ण्यतिव्याप्तिवारणायानियतदेशेति शेषं सुगमं॥ सामान्यभेदस्य लक्ष
णमाह व्यापकेति अ[illegible]रसामान्यादावतिव्याप्तिवारणाय व्यापकेति व्या
पकं मात्रं परमित्युक्ते गगनादावतिव्याप्तिस्ततो वक्तिसामात्रेति व्याप्य
तः

40

प१

सामान्यमेरमित्युक्ते परापरेति व्याप्तिः अतो मात्रेति वाप्यमात्रमित्युक्ते
असंभवः तदर्थं सामान्यमिति व्याप्य व्यापकमित्युक्ते व[illegible]स्यादावति
व्याप्तिरत उक्तं सामान्यमिति शेषं सुगमं ॥ विशेषस्समवाययोरवांतर
भेदाभावादभाव भेदांल्लक्षयति ॥ ॥ अनादिरिति गगनादावतिव्याप्ति
वारणायासाविति घटादौ तद्वारणाय अनादिरिति रूपादावतिव्या
प्ति वारणायानंत इति ॥ आत्मादौ तद्वारणाय सादिरिति अन्यो[illegible]न्याभा
वे तद्वारणाय संसर्गेति प्रागभावध्वंसयोरतिव्याप्ति वारणाय अनादि
रनंत इति अनादिरनंतो भावो त्यंताभावादाव[illegible] इत्युक्ते पुनरन्योन्या
भावे ततः संसर्गेति निषेध इत्युक्ते प्रागभावोप्सोदावतिव्याप्तिरत उक्तं
तादात्म्येति घटः पटो न भाति । इति घटे पट[illegible]तादात्म्यमारोप्य निषिध्यत
इति तादात्म्यनिषेध इत्यर्थः नित्यापरमाणुरूपेत्येव नित्यत्वं लक्षयति

न४

नित्यत्वमिति विरहो नित्यत्वमित्युक्ते नि त्यविरहे त्वनित्यत्वे ति व्या
प्तिरत उक्तं प्रध्वंसेति प्रध्वंसेति व्याप्तिवारणाय विरह इति प्रध्वंसवत्वं
तत्प्रतियोगित्वं ॥ प्रध्वंसोपळक्षित तत्सत्तायोगित्वं चेत्यर्थः ॥ परमाणुंळ
क्षयति निरवयवइति घटेति व्याप्तिवारणाय निरवयव इति गग
नेतद्वारणाय क्रियावानिति मनसोप्यणुपरिमाणवत्वेन ळक्ष्य
त्वान्नातिव्याप्तिर्यद्वा मनोळक्षणे स्पर्शशून्यत्वेन विशेषणादत्र
स्पर्शवत्वं विवक्षितं निरवयवस्यावयवनिरूप्यत्वादवयवं ळ
क्षयति। द्रव्येति अंत्यावयविघटादावतिव्याप्तिवारणाय सद्रव्येति
द्रव्यकारणमित्यर्थो ईश्वरादौ ततः समवायीति। शेषं सुगमं। शरीर
ळक्षणांत्यावयविज्ञानायतळक्षणमाह द्रव्येति॥ यद्यप्यदृष्टानंतरळ

मि॰भा॰

क्षणस्य वक्तव्ये वा शरीरलक्षणापानेतरं भोगादिवदन्त्यावयवीळ[illegible]चापि
तुमुचितः तथाप्यत्र द्रव्यापदव्यवच्छेद्यत्वेन प्राप्तत्वाद्देहलीप्रदीपन्यायेनोभ
यत्रोपकाराय। नैवलक्षितं तद्रूपदोषः॥ द्रव्यमन्त्यावयवीत्युक्ते परमाणवा
दावतिव्याप्तिस्ततः कार्येति एवमुक्ते द्व्यणुकादौ ततो नारंभकमिति एवं
चासंभवः अन्त्यावयविना शरीरादिना स्वगतरूपादेरारंभात्॥ ततो द्र
व्येति द्रव्यं द्रव्यानारंभकं द्व्यणुके गगनादौ ततः कार्येति प्रागभाववद्दि
ति प्रागभावप्रतियोगि कार्यमित्यर्थः॥ अन्यथा कार्योत्पत्त्यनंतरं प्रा
गभावाभावात्। प्रागभाव[illegible]वत्वमसंभविस्यादिति भोगेति भोगस्य
वक्ष्यमाणस्यायतनमन्त्यावयवि यत् तच्छरीरमित्यर्थः॥ अन्त्यावयविश
रीरमित्युक्ते घटेतिव्याप्तिस्तदर्थमायतनेति एवमप्यनेति व्याप्तिस्त
स्यापि यत्कि[illegible]यतनत्वात् अत उक्तं भो[illegible]गेति यदा तु वक्ष्यमाण

॥८९॥

षिणी

॥८९॥

लक्षणं तु स यतनशब्दः तदा तेनैव व्याप्तिसिद्धेः भोगपदं स्वरूप
कथनायैव यदा वा यतनपदमाधार मात्रवाचि तदा सार्थकमिति मंतव्यं॥
अथवा वक्ष्यमाणलक्षणं॥ भोगायतनस्यैव लक्षणं नायतनमात्रस्येति भो
गपदं सार्थकं॥ भोगायतनमित्येतावत्युक्ते मनस्यतिव्याप्तिस्तदवच्छिन्न
प्यात्मनि भोगजननात् ता. तत्र क्ते अवयवीति। एवं च हस्तादावतिव्याप्तिर
तन्नक्रमं येति। भोगलक्षणमाह [illegible]सोति। स्वस्मिन भोक्तरि समवेते ये सु
खदुःखे तयोरन्यतरस्य सुखस्य दुःखस्य वा यः साक्षात्कारः स भोग इ
त्यर्थः॥ साक्षात्कारो भोग इत्युक्ते पाटसाक्षात्कारोपि भोगः स्याद् तदुक्तं
दुः सुखेति एवं च सुख साक्षात्कारे व्याप्तिरतो दुःखेति। एवं चासंभवः सुख
दुःखयोर्युगपत्साक्षात्कारासंभवात्। क्रमे पातयोः साक्षात्कारे अन
नुगमः॥ उभयत्रानुगतधर्मस्यैकस्याभावाद् तत्र तोमन्यतरेति। अ

42

न्यतरत्वं तदन्यान्यत्वं च भयत्रानुगतमित्यर्थः सुखदुःखान्यतरसाक्षात्का
रो भोगइदृस्यके ईश्वरसाक्षात्कारे अतः स्वसमवेतेति॥ ईश्वरस्य शरीराद्य
भावेन तज्जन्यादृष्टाभावात् तदधीनयोः स्वसमवेतयोः सुखदुःखयोर
भावान्न तत्साक्षात्कार ईश्वरस्येत्याशयः। आयतनलक्षणमाह यदव
च्छिन्न इ[illegible] येन शरीरादिना अवच्छिन्ने संबद्धे आत्मनि भोगो जायते तत
च्छरीरीराद्यायतनमित्यर्थः॥ आत्मन्यतिव्याप्तिवारणाप[illegible]यदवच्छिन्न
इति शरीराद्यवच्छिन्नेन्यत्र भोगाभावादसंभवमात्रं क्यात्मनीति॥ ॥इं ॥४२॥
द्रियं लक्षयति साक्षात्कारीतीति साक्षात्कारियत् ज्ञानं तस्य करणं साधक
तममित्यर्थः॥ कारणमिंद्रियमित्युक्ते छिदिक्रियाकरणे कुठारादावति
व्याप्तिरतो ज्ञानेति एवं [illegible] धूमादिलिंगे अत उक्तं साक्षात्कारीति साक्षा
त्कारि[illegible]कारणमित्युक्ते न कोपि दोषः॥ तथापि साक्षात्वं धर्मो विषयनि

ष्टोन ज्ञाननिष्ट इति मतं निरसितुं ज्ञानसामानाधिकरण्यं निर्दिष्टमिति मं
तव्यं निरासस्तु साक्षात्कारस्य विषयनिष्ठत्वे घटं साक्षात्कारोमीति ज्ञानग
तत्वेनोनुभवो न स्यात् व्यवसायस्यैव तदाकारप्रसंगाच्चेति यद्वा सा
क्षात्कारिपदस्य व्युत्पत्त्या चक्षुरादावतिव्याप्तिवारणाय ज्ञानपदं
भोगकारणं विषय इत्युक्ते आत्मन्यतिव्याप्तिरत उक्तं आत्मन इति ॥
आत्मनः संबंधी यो भोगस्तस्य कारणमित्यर्थः तथा च आत्मातिरिक्तं कारणं प्र
तीयते यथा राज्ञो धनस्वामी भद्रसेन इत्युक्ते राजातिरिक्तः प्रतीयते। तदीय
धनस्वामी तद्वदित्यर्थः ॥ एवमपीश्वरादौ प्रसंगः ततो साधारणेति द्रष्टव्यं। ज्ञा
यमानेति। पादेंद्रियादौ प्रसंगवारणाय तद्विशेषणं ईश्वरादेरप्येवं नैवं च
व्यावृत्तिः तदा गंधवत्वे सत्यात्मनो भोगकारणं पार्थिवो विषयस्नेहवत्वे सत्या

मितभा लेन ग्राह्यत्वात्॥ याजयेदिति विभक्तिविपरिणामात् तेजो द्रव्यमित्यर्थः ऊष्मो सि
मादावतिव्याप्तिरतो जळेंधनमित्ति एवं चौदर्ये अत एव उक्तं मात्रेति। त्रोषधद्वैवृत्
भ स्वैंकयोरूप्ययोरतिव्याप्तिवारणाय पार्थिवजळेंधनमिति॥ सुगमंन्ये म २
त्॥ तेज आकरजं इत्यर्थः के अन्यत्रापि व्याप्तिरतो निरिंधनमिति। ओक
जस्य रूपमाह तत्रेति॥ आदिपदात्। रजतताम्रकस्य त्रपुसीनादयो ग्रा
ह्याः॥ अपार्थिककाळ्छेदस्य ळक्षणमाह॥ साकळेति॥ यौगपद्यमुत्प
त्तिरित्यर्थे के घटपटयोर्यौगपद्यमुत्पत्तिः स्यात्॥ अत उक्तं कारणेति॥ द्वि
॥८८॥ त्राणाकारणानां मेळनेति व्याप्तिरतः सकळेति॥ ननु यौगपद्यं कथमुत्प १८
त्तिः तदनंतरभावित्वात् उत्पत्तिरतो युक्तमुक्तं यौगपद्यमुत्पत्तिरिति॥ यौ
गपद्यं ळक्षयति॥ अनेकेषामिति संबंधो यौगपद्यमित्यर्थः के घटपटसंबंधे
तिव्याप्तिरतः ळक्षणेति॥ एवं एकस्यानेकळक्षणसंबंध अत एकेति। एवमप्येके
८१

यु

स्यैकक्षण संबंधेऽतोऽनेकेषामिति॥ ७॥ त्र संगागतं क्षणं ळक्षयति विभा
गेति विभानान्तुस्पाद्यायो विभागः कर्मजः तस्य यः प्रागभागः तेन संबद्धेय
त्कर्म तेनावछिन्नोयः काळः स क्षण इत्यर्थः॥ काळ क्षण इत्युक्ते सकळका
ळस्य क्षणापत्तिः ततो वछिन्नेति एवं चपक्षाहोरात्राद्दौ ततः कर्मेति ए
वमपि द्वित्रेषु क्षणेषु कर्मैकैवेति व्याप्तिरतः संबद्धेति तथापि घटसंबद्ध द्वि
त्रिक्षणे [illegible] ति व्याप्तिरतः। प्रागभावेति। एवमपि घटप्रागभावसंबद्धकर्मा
वछिन्नेति व्याप्तिरातो विभागेति॥ तथापि विभागजविभागप्रागभावसंब
द्धकर्मावछिन्ने क्षणच [illegible] तुष्टयेति व्याप्तिरतो विभागानुस्पाद्येति विभागानुस्पा
द्यविभागप्रागभावसंबद्धः क्षण इत्युक्ते प्रागभावस्य बहुकाळव्यापि
त्वात तत्राति व्याप्तिरतः कर्मेति ए [illegible] तदुक्तं भवति विभागप्रागभावः कर्म
णः पूर्वमपि वर्त्तते कर्म तु विभागोस्पत्यनंतरमपि ततः क्रियोस्पत्तिसमये

44

मितभा विभागप्रागभाव कर्मणो संबंधस्तदाधारः काष्ठः क्षण इति अथ वाक्षा षि
ळो पाध्यव्यापकः काष्ठोपाधिः क्षण इति क्षणमात्रावस्थायि क्षणिकमपि
प्रसंगादुक्तं ॥ ॥ ॥ स्थितिं लक्षयति। स्थितिरिति किं तद्वर्त्तमानत्वं अत
आह ॥ तेश्चेति प्राक्संबद्धो यो यस्वस्य घटादि कार्यस्याभावः तेन रहि
तं यत्स्वरूपं तद्वत्वं वर्त्तमानत्वमित्यर्थः स्वरूपवत्वं वर्त्तमानत्वमित्य
के विनाशेति व्याप्तिरतोभावरहितेति यस्य कस्याप्यभावरहितस्वरू
पवत्वं विनाशोप्यस्तीति ततोव्याप्तेस्त्वीति। विनाशस्याभावांतराभावान्नदो
॥४५। षः ॥ एवं चोत्पन्नाव[illegible]ति व्याप्तिरतोवदति प्राक्संबद्ध इति ॥ ॥ ॥ उत्प १४
त्तिस्तु सकलकारणयोगपद्यरूपा सा वर्त्तमानघटादेः प्रागभावस
हितैवेति न प्राक्संबद्धस्वाभावरहितेति न दोषः ॥ वर्त्तमानत्वस्य स्थि
तेर्वा लक्षणांतरमाह ॥ स्वकार्येति प्रागभावसंबंधत्वं विनाशोप्यस्तीति

कार्यपदं एवमपि विनाशोत्पत्तौ वातिव्याप्तिर् तदुक्तं स्वकार्येति स्वस्य घटादेः यत्कार्यरूपादि तत्प्रागभाववत्त्वमित्यर्थः॥ उत्पत्तिविनाशयोस्तु स्वनिष्ठकार्याभावात् न तत्प्रागभाववत्त्वमिति भावः॥ विनाशलक्षणं स्पष्टं नित्यज्ञानादिमत्वात्परमात्मनो लक्षणं स्पष्टमिति मत्वा जीवस्य लक्षणमाह॥ शरीरेति॥ ईश्वरेति व्याप्तिवारणाय शरीरसंबंधेनेति शरीरसंबंधे इत्युक्ते गगनादौ ततो ज्ञानवत्त्वमिति प्रत्यात्मेति प्रत्येकमात्मनि समवेतौ यौ धर्माधर्मौ ताभ्यामुपगृहीतत्वं स्वीकृतत्वं प्रत्यात्मनिष्ठत्वमित्यर्थः॥ उपगृहीतत्वं प्रत्यात्मनिष्ठत्वमित्युक्ते यदृच्छयोपगृहीतवस्त्रादिवति व्याप्तिरतोऽधर्मेति एवं च नारकशरीरे ततोम[illegible]धर्मेति॥ धर्मोपगृहीतमित्युक्ते देवादिशरीरे तस्य केवलधर्मेणासन्नत्वात् अतो धर्मेति धर्माधर्मयोरेवाभावात् धर्माधर्मोपगृहीतत्व असंभावीत्यत आह प्रत्या

मितभा॰

त्मसमवेतेति एकः सुखी अपरो दुःखीति सुखदुःखयोः प्रत्यात्मनियतत्वा
त्तत्कारणत्वेन धर्माधर्मावप्यात्मन्यकमेगतव्यावित्यर्थः॥ छ॥ छ॥ सि
ताद्यपुत्वपर्यंतानां तज्जातियोगित्व[illegible]मेवलक्षणं। जातिश्च कपिल
वृत्तिसकलसितवृत्तिरूपत्वावांतरजातिः सितत्वमित्यादिनोक्ता॥छ
छ॥ ॥ संयोगभेदं लक्षयति॥ कर्मासमवायीति संयोगजसंयोगेतिव्याप्ति
वारणाय कर्मेति कर्मासमवायीत्युक्ते विभागेतिव्याप्तिरतो वक्ति संयोग इति सं
योगासमवायिकारणः संयोग इत्युक्ते पटादावतिव्याप्तिस्तस्यापि तंतुसंयो
गासमवायिजन्यत्वात् अतः संयोग इति॥ संयोगमात्रं कर्मजोपि भवतीति तद्वा
रणाय संयोगासमवायीति। एवं विभागलक्षणेपि व्यावर्त्यं द्रष्टव्यं॥ तत्र फ
लपतनादावतिव्याप्तिवारणाय विभागेति॥छ॥ छ॥ आदित्यस्य परिवर्त्तनं तप
नपरिस्पंदः तेन उत्पाद्यमिति विग्रहः दिकृतेति व्याप्तिवारणाय आदित्येत्यादि

॥४६॥

षि

॥४

॥

आदित्यपरिवर्त्तनोत्पाद्ये दिशादिसंयोगेति व्याप्तिवारणायपरत्वापरत्व
मिति आदित्यसंयोगानुत्पाद्ये रूपाद्यपि भवति। अतो वक्तिपरत्वापरत्वमिति
कालकृतेति व्याप्तिवारणायादित्येत्यादि॥७॥७॥ बुद्ध्यवांतरभेदानलक्ष
यति। भावनेत्यादिना भावनासंस्कारः सोसाधारणं कारणं यस्य तत्तथा।
तच्चतत ज्ञानं चेति विग्रहः ज्ञानं स्मृतिरित्युक्ते अनुभवेति व्याप्तिरतो
ऽसाधारणकारणेति एवमप्यनिवृत्तिः अनुभवस्यापि प्रमाऽप्रमास्वरू भवः
पस्य गुणदोषासाधारणकारणजन्यत्वात् अतो भावनेति भावनाव्यव
हारेति व्याप्तिवारणाय ज्ञानेति भावनाकारणं ज्ञानमित्युक्ते प्रत्यभिज्ञान
प्रत्यक्षेति व्याप्तिरतोसाधारणेति प्रत्यभिज्ञानं तु इंद्रियसन्निकर्षासाधारण
केस्य दोषः। स्मृतिरूपादन्यदस्मृतिरूपं॥ घटादौ स्मृतौ चातिव्याप्तिवारणा
य ज्ञानस्मृतिरूपपदेगमालक्षणोपि घटादौ संशयादावतिव्याप्तिवारणा

वु

अनुभवतत्त्वपदे। एवमत्र मालक्षणमपि अवधारणं निश्चयज्ञानं तस्मादन्य-
तदनवधारणं तज्जाततज्ञानमिति विग्रहः। प्रमायामतिव्याप्तिवारणाय यानवधा-
रणेति घटादौ तद्वारणाय ज्ञानेति ज्ञाने विपर्यय इत्युक्ते प्रमायामतिव्याप्ति-
रतो तत्त्वेति। एवं च संशयेऽतिव्याप्तिरतोऽवधारणरूपेति। ज्ञानपदस्य
हार्थं अज्ञायमानं करणमिन्द्रियं तेन जन्यतत्त्वानुभव इति विग्रहः। अवधा-
रणरूपमित्युक्तेऽपि प्रमायामतो तत्त्वज्ञानमिति। अतत्त्वावधारणमित्येवलक्षण
तत्त्वानुभवः प्रत्यक्षमित्युक्तेऽनुमितौ प्रसंगः ततोऽज्ञायमानेत्यादि। अज्ञा-
॥४७॥ यमानेत्याद्युक्ते इन्द्रियसंयोगादावतिव्याप्तिरतस्तत्त्वानुभव इति शे-
षं गतार्थं॥ ५१॥ ५२॥ प्रत्यक्षप्रमायां प्रसंगवारणाय ज्ञायमानेति। ज्ञायमा- ॥४८
नं करणं लिंगशब्दादि तज्जन्य इत्यर्थः। ज्ञायमानकरणधूमादिजन्य-
मराकनि [illegible] टतो प्रसंगवारणाय तत्त्वानुभव इति शेषं सुगमं॥ ५३॥

प्रमाणं लक्षयति। प्रमेति अयोगो संबंधः तेन व्यवच्छिन्नं रहितं यत्तत्प्रमा
णमित्यर्थः। एवं चईश्वरे नित्याप्रमासद्भावत्तेत इति प्रमायोगव्यवच्छिन्नं ई
श्वरोपि प्रमाणं इंद्रियलिंगेपि प्रमाणं तयोर्व्यापारवतोः सद्भावे प्रमोत्प
द्यते एवेति प्रमायोगव्यवच्छिन्नत्वात्। प्रमायां अव्यभिचारि प्रमाणमित्य
र्थः। यद्यपि प्रमायोगव्यवच्छिन्नं सुखादावप्यस्ति तथापि तदन्यत्वं साध
नाश्रययोरन्यतरत्वे सतीति विवक्षितमित्यदोषः। तत्रायोगव्यवच्छिन्न
त्वं छिदायोगव्यछिन्नत्वं परं श्रौवर्त्तते इति तद्वारणायप्रमेति। प्रमा प्रमा
णमित्युक्ते फलेतिप्रसंग अतोयोगव्यवच्छिन्नेति प्रत्यक्षलक्षणं सुगमं।
तद्भेदमाह तच्चेति॥ ॥अनुमानं लक्षयति। अनुमितीति प्रत्यक्षेति व्याप्ति
वारणायानुमितीति॥ अनुमानस्वरूपमाह तच्चेति। व्याप्तिपक्षधर्मता
भ्यां विशिष्टं यल्लिंगं तस्य ज्ञानमित्यर्थः। अनित्यः शब्दश्चाक्षुषत्वादिति

स्वरूपासिद्धौ अतिव्याप्तिवारणाय पक्षधर्मताविशिष्टेति अनित्यः शब्दः प्रमेयत्वादित्याद्यनैकांतिकव्युदासाय व्याप्तीति। व्याप्तिविशिष्टंलिंगज्ञानमित्युक्ते अनित्यः शब्दः सामान्यवत्वे सति चाक्षुषत्वादिति। विशेष्यासिद्धौ प्रसंगोऽतः पक्षधर्मतेति व्याप्तिं लक्षयति व्याप्तिश्चेति यः कश्चन संबंधो व्याप्ति[illegible]तीत्यत्रोक्तं व्यापकस्य व्याप्याधिकरणवृत्ति व्याप्यमधिकरणं यस्य स तथा साध्यस्य साधननिष्ठः संबंध इत्यर्थः॥ एवं च सोपाधिके मैत्रीतनयत्वादिसबंधेति व्याप्तिरत उपाध्यभावविशिष्टत्वि इति व्याप्यव्यापकाभ्यां साधनत्वसाध्यत्वाभिमतौ धर्मौ विवक्षितौ पक्षधर्मतामाह॥ पक्षधर्मतेति। पक्षसंबंधः पक्षधर्मत्वमित्युक्ते पर्वते सत्वादावतिव्याप्तिरतो व्याप्यस्येति व्यापकव्याप्ययोर्लक्षणमाह व्यापकमिति सुगमं॥ ७॥ ७ उपाधिं लक्षयति। उपाधिश्चेति। अस्योदाहरणं मित्रायाः सप्तमः पुत्रः

श्यामो भवितुमर्हति मित्रापुत्रत्वात् परिदृश्यमानमित्राष्टपुत्रवदिति अनुमाने शाकाद्यन्नपरिणतिभेद उपाधिः उपसमीपे स्थित्वा साधने स्वधर्मं व्याप्तिमादधातीति उपाधिरित्युच्यते यथा जपाकुसुमं स्वसन्निहिते स्फटिके लौहित्यमादधातीत्युपाधिः अत्रोपाधेर्लक्षणं योज्यते साधनत्वस्य मित्रापुत्रत्वस्य अव्यापकत्वे सति साध्येन नरश्यामत्वेन समा व्याप्तिर्यस्य स तथा। तथा च यत्र यत्र नरश्यामत्वं तत्र तत्र शाकाद्यन्नपरिणामः यथा मित्रातनये श्यामे तथा यत्र यत्र शाकाद्यन्नपरिणामः तत्र नरश्यामत्वं यथा तत्रैव मित्रातनय इति साध्यसमव्याप्तिः तथा यत्र यत्र मित्रातनयत्वं तत्र शाकाद्यन्नपरिणतिभेद इति न व्याप्तिः पक्षीकृते मित्रापुत्रे शाकाद्यन्नपरिणतेरनिश्चयात् ततायमुपाधिः व्याप्तिस्तु साधनाव्यापक इत्युक्ते अनित्यः शब्दः कार्यत्वात् घटवदित्यत्र सदनुमाने सावयवत्वमुपाधिः स्यात् भवति चायं साधन

व्यापकः यद्यत्कार्यं तत्तत्सावयवमिति व्याप्तेः कर्मादौ व्यभिचारात् अत
त्र क्षे साध्यव्यापक इति एवं च तत्र नातिव्याप्तिः। सावयवत्वस्य साधनाव्या
पकत्वेपि साध्यव्यापकत्वाभावात् यद्यदनित्यं तत्तत्सावयवमिति सा
ध्यव्याप्तेर्गंधादौ व्यभिचारात्। अतः सावयवत्वं कार्यत्वेनोपाधिः साध्य
व्यापकत्वपाधिरित्पक्षे पूर्वस्मिन्नेवानुमाने प्रमेयत्वमुपाधिः स्यात्
यदनित्यं तत्प्रमेयमिति साध्यव्याप्तेः मत्वादत त्रक्षे साधनाव्यापकत्वे
सतीति। एवं च नातिव्याप्तिः यत्कार्यं तत्प्रमेयं न भवतीति साधनाव्याप
कत्वाभावात्। प्रत्युत यत्कार्यं तत्प्रमेयमिति सॉन व्याप्तेरेव सद्भावात्।
प्रमेयत्वं नोपाधिः। साधनाव्यापकत्वे सति साध्यव्यापकत्वपाधिरित्पक्षे
पूर्वानुमान एव शब्देतरत्वमुपाधिः स्यात् तस्य यद्यत्कार्यं तत्तच्छब्देतर
दिति व्याप्तेः शब्दे पक्ष एव व्यभिचारेण साधनाव्यापकत्वात् यदनित्यं

॥४६॥

वा

॥४

६४

तच्छुद्धेतरदिति साध्यव्यापकत्वाच्च तत उक्तं समेति। साध्यपुरःसरो पा-
धिपुरःसराच्च व्याप्तिर्यस्य स्वसमव्याप्तः यथा शाकाद्यन्नपरिणतिः शुद्धे-
तरत्वे तु यद्यपि साध्यपुरःसरा व्याप्तेरवस्ति तथापि यच्छुद्धेतरत्वं तदनित्य-
मिति न पाधिपुरःसरा व्याप्तिर्नास्ति आ काशे व्यभिचारात् अतः समव्या-
वा प्तेरभावान्नायमुपाधिः साध्यसमव्याप्तिरित्युक्ते अनित्या पृथिवी सावयव-
स्यातध वत्वादित्यत्र कृतकत्वमुपाधिः साध्यसमव्या प्तत्वात् तत उक्तं साधनाव्या-
पकत्वे सतीति कृतकत्वं च सावयवत्वव्यापकमिति न साधनाव्यापकत्वमतो नो-
पाधिः। ननूपाधिः कथं हेत्वाभासः व्याप्तिपक्षधर्मतयोरन्यतमस्याविघटनात्।
यथा विरुद्धानैकांतिकाभ्यां व्याप्तिर्विघट्यते तथा न शाकाद्यन्नपरिणामसद्भा-
वमात्रेणामित्रापुत्रत्वश्यामत्वयो व्याप्तिविघटिता भवति न ह्यन्यस्य साध्य-
व्यापकत्वसाधनाव्यापकत्वेऽन्यस्य साध्यव्याप्यत्वं विघटको तेन अप्रति

मितभा

षि

घ।

प्रसंगात् नाप्यसिद्धकाळात्ययापदिष्टत्वस्य पक्षधर्मताविघॅतेन उपाधिसत्वेपि
मित्रापुत्रत्वहेतोः पक्षनिष्ठत्वात् अतो नायं दोष इति चेत्। मैवं॥ व्यभिचारोन्ना
यकत्वेनोपाधिर्दोषत्वात् तथाहि साध्यस्य व्यापक उपाधिः पक्षाद्यावर्त्ती
मानः स्वव्याप्यं साध्यमादाय व्यावर्त्तते व्यापकनिवृत्तौ व्याप्यनिवृत्तेराव
श्यकत्वात् तथाच साध्याभाववति पक्षे विपक्षस्वरूपे वर्त्तमानो हेतुर्व्यभि
चारी भवति तदुक्तं व्यभिचारोन्नयं कुर्वन्नुपाधिर्यातिदोषतामिति। व्य
भिचारोन्नयस्त्वेवं अयं हेतुः साध्यव्यभिचारी साध्यव्यापकउपाधिव्य
भिचारित्वात् यो यद्व्यापकव्यभिचारी स तद्व्याप्यव्यभिचारी यथा पृथि
वीत्वव्यापकद्रव्यत्वव्यभिचारी गुणत्वादिः पृथिवीत्वव्यभिचारीति सा
मान्यतविशेषतस्तु मित्रापुत्रत्वश्यामत्वव्यभिचारी शाकाद्यन्नपरि
णामत्वेन व्यभिचारित्वात् प्रमेयत्ववदिति। विपक्षबाधकस्तर्कः। शा

॥५०।

॥५०।

सि

काद्यन्नपरिणामनरश्यामत्वयोर्वैद्यकशास्त्रादेव कार्यकारणभावावगमा
त् कारणाभावे कार्यश्यामत्वासंभवः। पक्षीकृते मित्रापुत्रे शाकाद्यन्नपरिण
तिरनिश्चयेपि साधनाव्यापकत्वात्संदेहाद्वास्येव संदिग्धोपाधिः एवं नि
र्द्धत्वभाववत्वाइंधनत्वादयो ज्ञेयाः। इत्यलमतिविस्तरेण॥ ७॥ ७॥॥ केवला
न्वयिहेतुं लक्षयति पक्षव्यापक इति पक्षव्यापकः केवलान्वयीत्युक्ते के
वलव्यतिरेकिण्यपि व्याप्तिः स्यात् तदर्थं सपक्षस्पर्शीति। एवमुक्ते धूमा
नुमाने अन्वयव्यतिरेकिणि अतो विपक्षशून्य इति विपक्षशून्य इत्येवोक्ते:
सर्वं क्षणिकं सत्वात् इति अनध्यवसितेति व्याप्तिरतः सपक्षस्पर्शीति
विपक्षशून्यसपक्षस्पर्शीत्युक्ते शब्दोपि घेयश्चाक्षुषत्वात् घटवदित्यत्रा
तो वाक्ये पक्षव्यापक इति चाक्षुषत्वस्य पक्षनिष्ठत्वाभावान्न दोषः व्याप
कपदेनैवाप्तिघेयशब्दो वर्णात्मकत्वात् इति भागासिद्धोपि व्युदासि एत

१३

मितभा

॥५१॥

त्रितायोक्तौ वह्निरनुष्णः पदार्थत्वादिति बाधितेति व्याप्तिरतो बाधितविषइतिए
वमभिधेयः शब्दः प्रमेयत्वात् अनभिधेयः शब्दः श्रावणत्वात् व्यतिरेके घटव
दिति सत्प्रतिपक्षेति व्याप्तिरतोसत्प्रतिपक्षइति॥ छ॥ छ॥ ॥ केळवे व्यतिरे
किणं ळक्षयति पक्षव्यापकः सपक्षशून्य इति विपक्षाद्व्यावृत्तः केवळव्य
तिरेकीत्युक्ते अन्वयव्यतिरेकिण्यति व्याप्तिः अतः सपक्षशून्य इति ए
तद्वयोक्तौ वेदः सर्वज्ञवक्तृक अक्लुषत्वात् यः सर्वज्ञवक्तृको न भवति स
चाक्लुषो न भवति यथा आत्मेत्यपि दोषप्रसंगः अतः पक्षव्यापक इति पक्षव्या
पक इत्युक्ते केळावन्वयिनि प्रसंगो तः सपक्षशून्य इति। एतद्वयोक्तौ स
र्वमनित्यं सत्वादित्यत्र प्रसंगोऽतो विपक्षाद्व्यावृत्तइति। अयं तु विपक्षा
भावान्न विपक्षाद्व्यावृत्तः विपक्षाभावश्च सर्वस्य पक्षीकृतत्वात् एतत्त्र
योक्तौ सर्वं कार्यं प्रधानजन्यं कार्यत्वादिति प्रत्यक्षादिबाधितेऽनुमाने

षि

॥५१

प्रसंगो ततो बाधितविषय इति। एवमपि सर्वं कार्यं सर्वज्ञजन्यं कादाचित्कत्वा
द्व्यतिरेके गगनवत् सर्वं कार्यं सर्वज्ञजन्य न भवति प्रमेयत्वादाकाशवदिति स
त्प्रतिपक्षोऽतिप्रसंगोऽतो असत्प्रतिपक्ष इति अन्वयव्यतिरेकिणं लक्षय
ति। पक्षेति। पक्षव्यापक इत्युक्ते केवलव्यतिरेकिणि प्रसंगो सपक्षस्पर्शी
ति। एव तद्वयोक्तौ केवलान्वयिनि अतो विपक्षाद्व्यावृत्त इति। केवलान्
वयिनि विपक्षाभावात्तत्र नास्ति व्याप्तिः। विपक्षाद्व्यावृत्त इत्युक्ते पुनः के
वलव्यतिरेकिणि अतः सपक्षस्पर्शीति एतद्वयोक्तौ अनित्यः शब्दः चाक्षुष
त्वे सति सामान्यवत्वादिति अत्रासिद्धभेदे अतो वक्ति पक्षव्यापक इति। ए
तत्त्रयोक्तौ परमाणवोऽनित्याः मूर्त्तत्वात् घटवदिति। अन्वयव्यतिरेकि
णि धर्म्मिग्राहकमानबाधितेऽति व्याप्तिरतोऽबाधितेति। एवमपि शब्दोऽनि
त्यः कार्यत्वात् नित्यः शब्दः श्रावणत्वादिति सत्प्रतिपक्षोऽति व्याप्तिरतोऽ

51

मितभा

सप्रतिपक्ष इति पक्षव्यापकत्वादिज्ञानाय पक्षादिलक्षणमाह। संदिग्धेति।
संदिग्धसाध्ययस्य तस्य भावस्तत्वं तेन इत्थंभूतलक्षणे तृतीया। संदिग्धसा
ध्यवत्वात् उपात्तपक्ष इत्यर्थः। उपात्तघटादावतिव्यापकमतो विशनष्टि सा
ध्यवत्वेनेति एवं च सपक्षेति व्याप्तिस्तस्यापि साध्यवत् उपात्तत्वादित्थंभा
वे तृतीयायां मत्वर्थस्योक्तत्वात्। अतः संदिग्धेति संदिग्धत्वेनोपात्तत्वंख्या
एवादावतिव्याप्तता तो वक्ति साध्यवत्वेनेति अधिकरणत्वं सपक्षमि
त्युक्ते विपक्षे यस्य कस्याधिकरणेति व्याप्तिरतः साध्येति एवं च प
क्षेऽति व्याप्तिरतो निश्चितेति निश्चितं य साध्यं वह्निमत्वादि त
स्याधिकरणं आधारः सपक्ष इत्यर्थः॥ निश्चितं च तत्साध्यानधिकरणं
चेति विग्रहः। अनधिकरणमित्युक्तेऽसंभवः। विपक्षस्यापि यत्किंचिदधि
करणत्वात्। अतः साध्येति एवमुक्ते वह्निमान् अयं पर्वतो धूमवत्वादिति

॥५२॥

षिपि

॥५२॥

प्रयोगमहाऽदोऽपि यदा कदाचिद्वह्निमत्त्वमस्ति नावति संदेहस्तदा
तस्य विपक्षत्वं नास्तीति तत्रातिव्याप्तिः तदर्थं निश्चितेति पक्षादीनां त्रया
णामपि तत्त्वेन निश्चितानामेकानुमितिजनकत्वा साध्याभाववत्त्वेन नि
श्चित एव विपक्ष इत्यर्थः। अर्थरूपमनुमानं स्वार्थं शब्दरूपमनुमानं
परार्थमित्यर्थः। पंचावयवोपेतत्वं वचनस्य रूपत्वं। ननु शब्दो नानुमानं लिं
गानुसंधानमंतरेण प्रमायोजकत्वात् प्रत्यक्षवदित्याशंक्याह शब्द
स्यापीति शब्दस्याप्यनुमानत्वं कुतः अनुमानविषयत्वेन अविनाभावो
पजीवकत्वेन वेत्यन्वयः अनुमानस्य विषयः परोक्षः स एव विषयो
यस्य शब्दस्य तस्य भावस्तत्त्वं तेनेत्यर्थः। हेतौ तृतीया तथा च शब्दोऽनु
मानं प्रमाणत्वे सति परोक्षविषयत्वादनुमानवदित्यर्थः। तथा शब्दा
नुमानं अविनाभावोपजीवकत्वात् अनुमानवत् अविनाभावमु

52

मितभा

पजीवृतीत्यविनाभावोपजीवकः कथमिति चेत् इत्थं। अग्निहोत्रं जुहुया
त् स्वर्गकाम इत्यत्र एतानि पदानि स्वस्मारितार्थसंसर्गज्ञानपूर्वकाणि
आकांक्षायोग्यतासंनिधिमत्पदत्वात् गामानयेत्यादिपदवत् पदार्थसं
सर्गो वाक्यार्थः स चाविनाभावबलेनैव लिंगरूपेण शब्देनावगतः अतः
शब्दोनुमानमेवेत्यर्थः तथा च लिंगरूपेणैव शब्दस्यार्थगमकत्वात् पूर्वपक्षे
हेतुरसिद्ध इति द्रष्टव्यं॥ छ॥ छ॥ ॥ प्रतिज्ञादीनां लक्षणमाह। तत्रेति। वचनं प्र
तिज्ञेत्युक्ते पर्वतो वह्निमानिति [illegible] घट इति वचनेतिव्याप्तिरतः पक्षेति प
॥५३॥ क्षधर्मत्ववचनं हेतुरित्युक्ते पर्वतो वह्निमानिति साध्यस्य पक्षधर्मतावच ॥५
नेऽतो लिंगस्येति शेषं पूर्ववत्। प्रतिज्ञादावतिव्याप्तिवारणाय दृष्टांतेति
एवं च यथा गोस्तथा गवय इत्यादौ प्रसंगस्ततोनुमानावयवत्वे सतीति
प्रकरणात् ज्ञातव्यं॥ लिंगस्येति वा अनुषंजनीयं परामर्शोस्तृतीयं
लिंगपरामर्शः वह्निव्याप्यधूमवानयमित्यादिव्याप्तिस्पक्षालिंगसंबंधो
या

नतस्मादित्येवंरूपेण प्रयुक्तं निश्चितसाध्यवचनं निगमनमित्यर्थः। प्रति-
ज्ञायामतिव्याप्तिवारणाय निश्चितेति दृष्टांतेतिव्याप्तिवारणाय लिंगसंबंधे-
नेति उपनयेतिव्याप्तिवारणाय निश्चियेत्यादि प्रयुक्तत्वं समाप्तिव्या-
तत्वं॥ छ॥ छ॥ हेत्वाभासं लक्षयेति अंगवैकल्यमिति। अंगानि पक्ष-
धर्मत्वादीनि तैर्वैकल्यं तद्रहितत्वमित्यर्थः। अनिश्चितत्वं स्वरूपाद्यदा-
वप्यस्तीति तद्वारणाय पक्षधर्मत्वेनेति क्वचिल्लिंगनेति पाठः। तत्रापि प-
क्षधर्मतायत्यर्थः पक्षविपक्षस्यत्रितयमनैकांतिकेप्यस्तीति तदर्थमा-
ह्रेति। अनैकांतिकानध्यवसितप्रकरणसमानां सं देहकार्यक-
त्वेन संदिग्धव्यपदेशं विधाय त्रितयं युगपदेव लक्षयति। साध्येति
साध्यं च साध्याभावश्च साध्यो यस्य स साध्यतदभावसाध्यः तस्य भा-
वस्तत्वं विरुद्धे सदनुमाने चातिव्याप्तिवारणाय उभयसाध्यत्वमुक्तं तत्र
प्रमेयत्वस्यानैकांतिकस्य साध्यतदभावव त्तित्वेन उभयसाधनस्स

भवात् अनध्यवसितस्य पक्षमात्रवृत्तित्वेनोभयसाधनसंभवात् प्रकरणा
समस्य साध्यतदभावयोः समत्वेनोभयसाधनसंभवात् त्रयाणामुभय
साध्यत्वं अन्यतरनिर्णयाभावादेव च संदिग्धत्वं अपरं च स्वयमूह्यं ।। विस्त
रभयात्तु नोच्यते कश्चित्वनैकांतिकानध्यवसितयोः पृथक्लक्षणं द
त्ते तदा संदिग्धत्वशब्देन सत्प्रतिपक्ष एव ग्राह्यः पूर्वपाठ एवं तु सार्वत्रि
कः टीकांतरसंमतश्चेति बाधं लक्षयति। नपक्षी व्येति। नपक्षी व्येन अ
धिकबलेन प्रमाणेन निश्चितः साध्यविपरीतः साध्याभावो यस्य त
स्याभासत्वं तत्कालात्ययापदिष्टत्वमित्यर्थः। साध्यविपरीतत्वं संदिग्धेपर्व
तेप्यस्तीति सदनुमानेतिव्याप्तिवारणाय निश्चितेति छलजात्यादिना निश्चित
साध्यविपर्यये सदनुमानेतिव्याप्तिवारणाय प्रमाणेति सत्प्रतिपक्षेतिव्याप्ति
वारणाय नपक्षी व्येति।। छ ।। छ ।। तर्कं लक्षयति।। अनिष्टेति। अनिष्टं यत

वर

व्यापके धूमाभावादिरूपे तस्य प्रसंजनं तर्क इत्यर्थः त्वं चोरस्त्वमपि चोर
इत्यादि मतानुज्ञायामतिव्याप्तिवारणाय व्यापके इति महाह्रदे वह्निर्नास्ति धूमो
ऽपि नास्तीत्यादिप्रसंजनेति व्याप्तिवारणायानिष्टेति । प्रसंजनं लक्षयति। तु
ल्यत्वेनेति। तुल्यत्वं सामान्यदेशकालावच्छिन्नत्वमभावयोर्व्याप्तिमत्वमिति
यावत् यत्र यदा वह्निर्नास्ति तत्र तदा धूमो नास्तीति प्रतीयते। एवं च अ
भावयोर्मध्ये तुल्यत्वेन हेतुना यत्प्रत्यभाववचनं प्रतिकूलाभाववच
नं तस्य प्रसंजनमित्यर्थः प्रत्यभाववचनप्रसंजनमित्युक्ते यदि सुखं
तर्हि दुःखं नेति वचनेति व्याप्तिरतो भावयोरिति। एवमुक्ते यद्यग्निर्न
स्या[illegible]त्तर्हि लिंगं न स्यादिति वचनेति प्रसंगः। तत्तु[illegible]ल्यत्वेनेति व्या
प्याभावारोपे व्यापकाभावारोपः प्रसंजनमिति रहस्यं अभावयोः प्र
त्यभाववचनमित्येन तत्र बाढ व्याप्तिप्रायेण वस्तुतस्तु यदपीतं ज

54

मितभा

ब्धंपरमेतरथ कात्तु तर्हि तदविशिष्टमामपि देहेंद्रियादौ भावयोरपिप्र
संज्ञनस्य दृष्टत्वादिति॥ ५४॥ ५५॥ स्वप्नं लक्षयति। निद्रेति। निद्रादोषेणादुष्ट
यदंतःकरणं मनस्तज्जन्यं ज्ञानं स्वप्न इत्यर्थः॥ जागरे घटादिज्ञानव्क
मे दासायां तःकरौति जाग्रसुखादिज्ञानव्क दासायदुष्टेति जाग्रन्मानस
त्वमव्कदासाय निद्रेति। कैयं निद्रानामेत्यत आह योगजेति योगाभ्या
सेन जनितो धर्मो योगजः तेनाननुगृहीतस्य असहकृतस्य मनसो
॥५५॥ निरिंद्रियस्य प्रदेशो वा त्वगिंद्रियसंबंधरहिते स्वच्छेवर्त्तनं निद्रेत्यर्थः स
माधावतिव्याप्तिवारणाय योगजधर्माननुगृहीतस्येति॥ ग्रहणं निर्विक
ल्पकनिष्प्रकके भ्रमेतिव्याप्तिरतो वस्तुपदं एवं च सविकल्पकप्रमा
यां अतो मात्रेति इंद्रियादौ अव्याप्तिवारणाय ग्रहणमिति निर्विकल्प
केति व्याप्तिवारणाय विशिष्टपदं वस्तु[illegible]ग्रहणं प्रत्यभिज्ञेप्रकके अपि

षि
।५५

ज्ञायामतिव्याप्तिरतो ऽतीतेतित्यादि नत्त[illegible] रं [illegible] ळक्षणत्रयं सुगमं । कृहन
म्न ह इति व्युत्पत्त्यैव कृह ळक्षणस्य प्राप्तिमिति मत्वा अनध्यवसायं ळद्वयति ॥
अनाछिंगितेति । अनाछिंगिते अस्पष्टेनभयकोटीयस्यानवधारएज्ञान
स्य सोनध्यवसाय इत्यर्थः अनवधारणस्थ ज्ञानं न स्थाणुपुरुषसंदेहेति
व्याप्तिपकमतो ऽनाछिंगितेत्यादि ॥ छ ॥ छ ॥ सुखभेदो ळद्वयति । प्रयत्नो
-पायेति प्रयत्नो साध्यं साधनं स्त्रक्चंदनादि तदधीनं तच्चान्यमित्यर्थः सु
खं सांसारिकं इच्छन्ति परामिमते नित्यसुखेति व्याप्तिरतः साधनेति एव
मुक्ते स्वर्गे अतः प्रयत्नेति इ[illegible]च्छामात्राधीनं च तत् [illegible] साधनं चेति विग्रहः
साधनसाध्यत्वं इच्छासाधनसाध्यत्वं वा सांसारिके प्यस्तीति तद्वारणा
यमात्रेति ॥ छ ॥ छ ॥ उत्तमभेदं ळद्वयति । सांसिद्धिकत्वमिति सुगमं ळद्वे
ण द्वये उत्तमिच्छभयं चापि संबंधनीयं अतएव गगनाळोकयोर्न प्रसं

॥न्ता॰भ॰॥

शि॰

गः वेगभावनालक्षणे सुगमे स्थित्यापादको गुण इत्यस्येकं स्थित्यापादकः
संस्कार इत्यपरं इति विभज्य स्थितस्थापकस्य लक्षणद्वयं द्रष्टव्योऽव्येति
व्याप्तिवारणाय गुण इति वा संस्कार इति वा विशेषणं। नुत्वापादकः संस्का-
र स्थितस्थापक इति केचित्प्राहुः स तु वेष्टनजनके अव्यापक इति उपेक्षणी-
यः स्यात् तत्स्थित्यापादको गुणः संस्कारस्थितस्थापक इत्येवं लक्षणं विभा-
गं न द्रष्टव्यं॥ ७॥ ७०॥ इच्छाद्वेषावान्तरभेदानामनुक्तानि लक्षणानि स्वरू-
॥५६॥ पनिमेरूक्त्येव द्रष्टव्यानि गुणानामनुक्रमव्यापकत्वादि लक्षयति। अव्या- ॥५६
कत्वमित्यादि नासमानो देशो यस्य तस्य भावः सादेश्यं एकनिष्ठत्वमिति
यावत्। सादेश्यं रूपरसादौ वर्त्तत इत्यभावेति पदं तदभावसादेश्यं घट-
त्वस्य वर्त्तत एवेति अत उक्तं स्वेति एकस्मिन्नेवेतरागुळीसंयोगतदभा-
वो वर्त्तत इति संयोगोऽव्यापक इति एवं विभागसुखादिशब्देषु द्रष्टव्यं। ७

व्यापकत्वलक्षणं सुगमं विहितादित्रयं सुगममेव ॥ ७ ॥ जात्युपाध्योर्लक्षणमाह निर्बाधकमि-
ति बाधकं तु व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः ॥ रूपहानिरसंबंधो जातिबाधक-
संग्रह इति किरणावली लीलावतीकारोक्तं व्यक्तेरभेद आकाशादौ तुल्यत्वं हस्तत्वकर-
त्वादौ संकरो भूतत्वमूर्त्तत्वादौ तथाहि भूतत्वं मूर्त्तत्वं परिहाय आकाशे वर्त्तते मूर्त्तत्वं च भूतत्वं
परिहाय मनसि वर्त्तते तदुभयं पृथिव्यादिचतुष्टये वर्त्तते इति परस्परात्यंताभावसमाना-
धिकरणयोर्धर्मयोः सामानाधिकरण्यं लक्षणं सांकर्यं भूतत्वमूर्त्तत्वयोर्भवति तदुक्तं
अन्योन्यपरिहारेण भिन्नव्यक्तिनिवेशिनोः सामान्ययोः समावेशो जातिसंकर उच्य-
ते इति अतएव तदुभयमुपाधिरूपं सामान्यं अनवस्थितिः जातौ जात्यंगीकारे रूपहानि-
र्विशेषत्वादौ असंबंधः समवायादौ समवाये समवायानंगीकारात् ॥ एवंविधजातिबा-
धकाभाववद्यत्सामान्यं जातिः ॥ बाधके तु सोपाधिकं सामान्यमित्यर्थः ॥ ८ ॥ अंधकारलक्ष-

सा

56

यति॥ आरोपितेति घटाद्यभावेति व्याप्तिवारणाय नीळरूपइति एवं सत्यसंभवः ततः आरो
पितेति आरोपितनीळरूपोधकारइत्युक्ते आरोपितनीळरूपः स्फटिकादावति व्याप्तिरतो
ऽभावइति ज्ञानसंबंधं ळक्षयति ज्ञातेति ज्ञाततां ळक्षणं ज्ञानसंबंधः तस्य ळक्षणं ज्ञानविषय
त्वमित्यर्थः। ज्ञानविषयत्वप्रसंगेन प्रमाविषयत्वं ळक्षयति॥ तत्वज्ञानेति॥ अवच्छेदकत्वं व्या
वर्त्तकत्वं विशेषणत्वं विषयत्वमिति यावत्॥ शुक्तिरजतसंसर्गे भ्रमविषयेति व्याप्तिवारणा
यतत्वज्ञानेति संख्यायाइव गुणेइत्यनेन संख्यायागुणांतर्भावे गुणादौ कथंतद्व्यवहार
इत्यत आह॥ गुणादिवृत्तिसंख्यया सहगुणादीनां प्रत्यासत्तिः एकार्थसमावायाश्रयी
भूते विद्यमानत्वात् अनयोः रूढा सान्निध्याद्गुणादिषु औपचारिकी संख्याव्यव
हारइत्यर्थः। तथापि नदोषइत्यर्थः। अतएव गुणानां प्रत्यासन्निबंधनत्वं कारणमित्यर्थः।
इदमिदानीं कारणं ळक्षयति ळक्षणात्तु निबंधनस्तत्कारणकइत्यर्थः फळितमाह॥

८

॥८

ऽतएवेतिव्यवहारस्येतिशेषः अतएवन्नापचारिकत्वादेवेत्यर्थः॥ कारणं लक्षयति कार्ये
ति॥ उत्पत्तेः सापेक्षत्वात् कार्यपदं कार्योत्पादकसमवायिकारणमित्यस्य निमित्तादौ प्रसंगो
ऽतः स्वसमवेतेति अवधृतं निश्चितं सामर्थ्यं यस्य तत्तथा एवंविधत्वत समवायिकारणप्रत्या
सन्नं चेति विग्रहः अवधृतेत्याद्युक्तौ समवायिकारणे अतः समवायिकारणप्रत्यासन्न
मिति। एतावन्मात्रोक्तौ पटं प्रति तंतुरूपादेरपि असमवायिकारणत्वप्रसंगः अतोऽवधृते
ति समवायिकारणप्रत्यासन्नत्वं द्वेधा कार्यैकार्थसमवायो यथा तंतुसंयोगस्य पटेनैका
र्थसमवायः कारणैकार्थसमवायो यथा तंतुरूपस्य पटरूपसमवायिकारणेन पटेन तु तं
समवायः निमित्तकारणलक्षणं स्पष्टं॥ महत्त्वं लक्षयति इयत्तेति इयत्तापरिच्छेदः अविच्छु
त्वमिति यावत् तेनावच्छिन्नं यत्परिमाणं तेन योग इत्यर्थः॥ आकाशापरिमाणेति व्याप्तिवारणाय
इयत्तावच्छिन्नेति॥ अमूर्त्तत्वलक्षणं स्पष्टं कारणप्रसंगात् सामग्रीं लक्षयति॥ कार्येति कार्यस्य अयो
गव्यवच्छेदः अव्यभिचारः तद्वती सामग्रीत्यर्थः॥ व्यवच्छिन्नेत्यस्य यत्किंचिद्व्यवच्छेदं यत्ति। विस्तरो

गो०

ल्ता॰

दि

तितद्दतिव्याप्तिपरिहारायप्रयोगेति शेषं स्कन्दमं सर्वळक्षणमळक्षतमुद्देशं ब्रूच्यति संज्ञेति मात्रे
ण यद्विपदार्थानां यदभिधानं नामसंकीर्तनं तदुद्देश इत्यर्थः अभिधानमुद्देश इत्युक्ते गगनतळगत
निर्मळकमळ इति व्याप्तिः तस्याप्यभिधानत्वात् तद्भंगाय पदार्थानामिति एतावत्युक्ते गंगायां घोष इति वा
क्ष्या तीरे घोष इति प्रतीतेर्ज्ञायमानत्वात् तदीत व्याप्तिव्याघात यतथाप्यनित्ति तन्नत्वपरि बोध्यस्वस्ति
ळक्षणेति व्याप्तिवारणाय संज्ञामात्रेति एवमुद्देशळक्षणमभिधाय किंचित्साधर्म्यं वदत्रीयनगुण
दीनामाश्रयमाह रूपेत्यादिना ॥ ५ ॥ पृथिव्युदकाम्सना चतुर्देश गुणावत्वं तेजस्येकादश गु
णाः ॥ वायोर्नव गुणाः ॥ इश्वरमनसोरष्ट गुणाः ॥ गगने षड्गुणाः ॥ दिक्काळयोः पंच गुणा इति इद ५४
मिव च तद्वदतां साधर्म्यं अन्यापेक्षयाच वैधर्म्यं कर्माश्रयमाह ॥ कर्मेति मूर्तेइ व्याप्यामेतत्साधर्म्यं
इतरापेक्षयाच वैधर्म्यं इत्यर्थः ॥ इतरेषां तदभाववत्वं वः निःक्रियत्वं साधर्म्यं सूचितं भवति इ
व्यादीनां त्रयाणां साधर्म्यमाह ॥ सामान्यमिति इतरेषां निःसामान्यं साधर्म्यमुक्तं भवति वि
शेषाणां साधर्म्यं वैधर्म्यं चाह ॥ विशेषा इति ॥ समवायाभावयोः साधर्म्यमाह ॥ समवायेति ॥

३२

कार्यद्रव्यसाधर्म्यमाह॥ द्रव्यत्विति॥ अकार्यद्रव्यसाधर्म्यमाह॥ अकार्यमिति॥ ५४॥ ॥द्रव्यादी
नां विनाशं निरूपयति॥ विनाशस्त्विति समवायिनाशात् द्रव्यनाशो यथा तंतुनाशात् प
टनाशः असमवायिकारणनाशात् यथा परमाणुसंयोगनाशात् द्व्यणुकनाशः॥ गुणस्य
विनाशं निरूपयति गुणस्येति द्वंद्वांते श्रूयमाणस्य कारणपदस्य प्रत्येकं संबंधः समवा
य्यसमवायिनिमित्तकारणनाशाच्च विरोधिगुणाच्चेति द्वंद्वः घटादिगतरूपादीनां समवा
यिघटादिनाशान्नाशः संयोगविभागयोरसमवायिकारणयोर्नाशात् संयोगजसं
योगविभागजविभागयोर्नाशः अपेक्षाबुद्धिनिमित्तकारणनाशात् परत्वापरत्वद्वित्वदि
पृथक्त्वादीनां नाशः उत्तरशब्देन विरोधिना पूर्वशब्दस्य उत्तरज्ञानेन पूर्वज्ञानस्य
दुःखादिना सुखादेर्नाशाच्च विरोधिगुणनाश्यः। कर्मणो नाशमाह॥ कर्मण इति समवा
यिनाशात् यथा विनश्यदवस्थद्रव्यगतकर्म असमवायिनाशात् यथा शरवेगनाशात्

च कृतकर्मनाशः उत्तरसंयोगाद्यथा शरादेरभिघातात्तत्कृतकर्मनाशः ॥ अभावस्य
विनाशमाह ॥ प्रागभावस्येति अन्योन्याभावश्च केषांचिन्मते नित्यः नहि पटे नष्टेपि
तदन्योन्याभावो विनश्यति नदा विनष्टघटस्य पटतादात्म्यापत्तेः अन्योन्याभावस्य
स्य तादात्म्याभावरूपत्वात् ॥ तथापि तत्प्रतियोगिविनाशे सोपि विनश्यतीत्यभ्युपेत्यो
क्तं ॥ ७ ॥ ८ ॥ उत्पत्तिं निरूपयति उत्पत्तिस्थित्यादिना गुणस्यत्य तस्य ष्टः गुणस्ये
त्विति समानजातीयं तन्त्वादिरूपादि पटादिरूपादेरसमवायिकारणं ॥ असमानजा
तीयं द्व्यणुकपरिमाणं प्रति परमाणुद्वित्वसुखादिकं प्रत्यात्ममनःसंयोगः संयोगवि
भागवेगानां च कर्मासमवायिकारणा साधारणं निमित्तकारणमाह ॥ निमित्तेति आदि
शब्देन देशकालादृष्टादि अभावस्योत्पत्तिमाह अन्योन्याभावेति अभावस्य क्वापि
समवायाभावात् न समवायिकारणं तदभावादेव च तत्प्रत्यासन्नत्वलक्षणमसम

सवायिकारणमपि नेति केवळनिमित्तादेवोत्पत्तिः [illegible] दित्य
र्थः ॥ अत्यताभावस्य प्रागभावस्य च नोत्पत्तिः यद्यप्यन्योन्याभावस्यापि नो
त्पत्तिः ॥ न हि घटरूपप्रतियोग्यनुत्पत्तावन्योन्याभावो नास्ति तथा च सति अनुत्प
न्नो घटः पटो न भवतीति प्रत्ययो न स्यात् तथापि घटेनुत्पन्ने अयमयं न भवतीति स्पष्टं
ज्ञायते इति तदनुसारेणोत्पत्तिरूक्तो ॥ छ ॥ ॥ छ ॥ नन्वभावो नाम कश्चित्पदार्थोस्ति
ये। न तस्योत्पत्तिविनाशविचारः कर्त्तव्यो भवेत् तथा हि प्राभकरः भावांतरमेव भा
वापेक्षया अभाव इति व्यवह्रीयते परं न तु व्यवहारविषयः पदार्थांतरमस्ति मा नाभावा
न्नास्ति प्रत्ययो वा नास्तीति व्यवहारान्यथानुपपत्तिर्नातत्र मानमिति चेत् न प्रत्यक्षा
र्थापत्तोश्च [illegible]भूतळादिभावावलंबनतयान्यथासिद्धत्वात् ॥ ननु नास्तीति प्रत्यय
व्यपदेशायोभूतळाळंबनत्वे घटवत्यपि भूतळे अभावप्रतीतिव्यवहारो [illegible] स्यातो

तोमितिचेत् तमैव केवलभूतलस्याभावव्यवहारे हेतुत्वात्॥ घटवद्भूतलादन्ये भूत-
तलत्वं च केवलत्वं तत्रान्योन्याभावव्यवहारो घटपटादिस्वरूपमवलंबते संसर्गा-
भावस्तु कपालभूतलादिना भवति कपाले प्रागभावप्रध्वंसयोः व्यवहारः भूतले
ऽत्यंताभावव्यवहारः अतो नातिरिक्ताभावे मानं किंचित् पश्याम इति॥ यथाहुः॥ भा-
।६०। वांतरमभावो हि कयाचित्तु व्यपेक्षया भावांतरादभावोन्यो न कश्चिदनिरूपणादिति
॥५॥ ॥अत्रोच्यते॥ अभावस्तावदतिरिक्तोऽभ्युपेयः॥ अन्यथा तत्प्रतीतिव्यवहा- ।६०।
रयोरनालंबनतापत्तेः तथाहि व्यवहारो व्यवहर्तव्यपदार्थज्ञानसाध्यः न च घटादि-
स्वरूपभूतलं वा व्यवहर्तव्यं किंत्वभावः॥ तत्तेज्ञानं चेतन्न विना न भवति अतो भा-
वो ज्ञानविषयोतिरिक्तोस्तीति प्रत्यक्षादिर्नान्यथासिद्धिः किंच भूतले घटादेरभाव-
त्वे सस्वातियोगिकतापत्तिः अभावस्य घटाभावः पटाभाव इति प्रतियोगिसापेक्ष

अपिचस्वरूपस्यान्योन्याभावत्वे दूरात्तँरूसमूहे नयनातिथिकृतेएकाने
कृजिज्ञासा न स्यात स्वरूपग्रहणे नैवान्योन्याभावरूपभेदग्रहात [illegible]जावयंस
पइति विभ्रमो न स्यात् स्वरूपग्रहणे नैव विशेषदर्शनस्य जातत्वात् अविवे
काभावात् नासौ वविभ्रमो मम ते सर्वे ज्ञानानां यथार्थत्वादिति चेत् न रज्जुरि
यं सर्प्पो ज्ञायिमयेति सकळळोकानुभवबाधप्रसंगात्॥ ळौकिकपरीक्षके
सिद्धविभ्रमानंगीकारे गुरोरपि ळघुत्वापत्तेः॥ अपिच केवळं भूतळमेवाभाव
इत्यत्र किमिदं कैवल्यं नाम भूतळमात्रं चेत् घटवत्यप्यभाववव्यवहारप्रसंगा
त् अभावाधारभूतळं चेद्भावस्वीकारापत्तेः॥ घटवद्भूतळभिन्नं भूतळं के
वल्यइत्यस्य वाच्यमिति चेत् तर्ह्यभावोपि स्वीकृत एव अभावाधारत्वज्ञानमत

नतर्गा

षिए

रेण घटवद्भूतले भिन्नलक्षणाभावात् तस्माद्व्यवहारान्यथानुपपत्त्या प्रत्यक्षेण
वातिरिक्तो भावोऽभ्युपगंतव्यः अतस्तेस्यो सयादिविचारः सफळ एव ॥ छ ॥ छ ॥
ननु भवत्वभावोऽधिकः स्थापितः ग्राहकप्रमाणं किमिति चेत् केचित् प्रत्यक्षं
यथा इह भूतले घटो नास्तीति केचिदप्यनुमानं यथा वन्ह्यभावेन धूमाभा
वज्ञानं ॥ ननु भूतले घटाभावग्राहं न प्रत्यक्षेण इंद्रियाभावयोः संबंधानि
रूपणात् अपि तु योग्यानुपळब्ध्या संगृह्यते इंद्रियं वाधारमात्रं उपेक्षणीयं ॥
।६४॥ ननु तर्हि अंधस्यापि त्वगिंद्रियेणाधारे भूतले वस्तुनि गृहीते नीळरूपप्रति ।६४॥
योगिनि स्मरणे नीळाभावप्रसंगः संबंधस्य प्रतियोगि नीळरूपग्राहकं च
क्षुषोऽभावान्नाप्रसंग इति चेत् न ममापि हि तत्प्रतियोगिग्राहकेंद्रियेणाधि ६
करणग्रहणाभावात् नातिप्रसंग इति चेत् न उच्यते इह भूतले घटो नास्तीति

ज्ञानमिंद्रियजन्यं अपरोक्षत्वात् रूपज्ञानवत् न चापरोक्षत्वमसिद्धं इंद्रियान्वय
व्यतिरेकानुविधानेन तत्साधनात्॥ अतो भावस्येंद्रियग्राहकत्वसिद्धिः॥ न चेंद्रि
याभावस्य संबंधाभावाद्बाधः इंद्रियसंबद्धभूतले तळे विशेषणविशेष्यभावस्येवेंद्रि
यसंबद्धत्वात् तथा अभावज्ञानमिंद्रियजन्यं अज्ञानकरणाजन्यत्वात्॥ रूपा
दिज्ञानवत् न चासिद्धिः॥ अनवस्थाभियानुपळब्धेरप्यज्ञाताया एव कारणत्वां
गीकारात् अभावस्यानेंद्रियकत्वे वायौ रूपाभावो न गृह्येत अनुपळब्धिस
हकारिप्रतियोगिग्राहकेण चक्षुषा वायोराधारस्याग्रहणात् मा भ्रस्यद्वा
रूपाभावस्तत्रानुमीयत इति चेत् न लिंगाभावात् रूपवत्तया अनुपळभ्यमा
नत्वस्य लिंगत्वे वायुविशेष्यकानुमितिरेव स्यात् न रूपाभावविशेष्यिकतामंत
रेण वायौ रूपाभाव इति तद्विशेष्यकत बुद्ध्यनुपपत्तेः तस्माच्चे चिदिंद्रियेण

61

तर्क॥

बिगि

६२

क्त्विनानुमानेनाभावावायह इति सिद्धं ॥ छ ॥ छ ॥ ननु शास्त्रस्य त्रेधा प्रवृत्तिरुद्दे-
शो लक्षणं परीक्षा चेति तत्र शास्त्रैकदेशो संबद्धप्रकरणेपि उद्देशलक्षणवत्
परीक्षापि कर्त्तव्येत्यत आह ॥ अपरमिति एतत्पदिवापरपटने सुबोधमित्यर्थः ॥
यद्वा अपरेष्ववांतरभेदाविशेष्यविशेषणादयो लक्षणीया इत्यत आह वैशिष्ट्य-
मिति नीलमुपलक्ष्यमित्यत्र नीलेनानीलव्यावृत्तिरुपलक्ष्यते ततोन्यव्यावृत्ति-
वैशिष्ट्यमित्यर्थः ॥ वैशिष्ट्यं हि विशेषणाधीनमिति तल्लक्षयति समानेति व्यावर्त्त-
क व्यावृत्तिबुद्धिजनकं इतरव्यावृत्त्यासमानमेकमधिकरणं यस्य तत्तथा दं-
डरूपविशेषणं स्याद् दंडव्यावृत्त्या सममेकस्मिन् दंडिनि वर्त्तमानं वा तु समाना-
धिकरणमित्यर्थः ॥ व्यावर्त्तकत्वमात्रमुपलक्षणं जटादावप्यस्तीति ततो विशि-
नष्टि समानेति समानाधिकरणमित्येवोक्ते रूपरसादौ प्रसंगः ततो व्याव-

॥६२॥

र्त्तोकेति न हि स्वपरसाविच्छक्त्के कुतश्चिंत्किंचिद्व्यावर्त्त्येते किंतु सामानाधिकरण्य
आह एकेति एकासमानाविभक्तिरंते यययोः पदयोः स्तद्वाच्यत्वं तदभिधेयत्वमित्य
र्थः॥ एतच्चरूढ्याभिधीयते अवयवार्थस्तूक्ते एव ग्राह्यः॥ पदवाच्यत्वेऽटाभिस्ता
पसदूत्यादिवैय्यधिकरण्येप्यस्तीति तद्व्युदासाय एकविभक्त्यंतेति विशेषण
प्रतियोगितादूपलक्षणालक्षयति व्यधिकरणमिति इतरव्यावृत्त्यो विविधविरू
द्धंभिन्नमधिकरणं यस्य तत्तथा जटाकाकादीनामितरव्यावृत्त्यासदैव वर्त्तमा
नत्वनियमाभावात् अवच्छेदकव्यावर्त्तकं विशेषणेति व्याप्तिवारणाय व्यधि
करणमिति व्यधिकरणालक्षणं स्पष्टं॥ समानाधिकरणाद्यपेक्षितमधिकरण
लक्षयति जातीति जातेः प्रत्यासत्तिः संबंधोयर्थस्य तत्त्वमधिकरणत्वमित्यर्थः यद्वा
अधिकरणत्वमधिकरणनिष्ठो धर्मः स्वजातिसंबंधो तत्यर्थः॥ ननु जातिप्रत्य

62

मा।

षिणि
गा

सत्तेः सामान्यादेदावभावात्तस्याधिकरणत्वं न स्यात् तथा च प्रमेयं सामान्यमभि-
धेयं सामान्यमिति विशिष्टप्रत्ययो न स्यात् समानाधिकरण्याभावात् न च संयो-
दिसंबंधाभावात् प्रमेयत्वस्याधिकरणमेव सामान्यादीति वाच्यं अभावसम-
वायादावर्थमवश्यमंगीकृतस्वरूपसंबंधसत्त्वात् अन्यथा भूतले घटाद्यभाव
इति धीर्न स्यात् इति चेत् ॥ मैवं ॥ प्रमेयत्वादेरपि जातित्वात् प्रमात्वमेव हि प्रमावि-
षये स्वरूपसंबंधेन वर्त्तमानमुपाधिरित्युच्यते न्वैवं सामान्यादेर्जात्याधा-
रत्वाज्जातिमत्त्वप्रसंगे अपसिद्धांतः इति वाच्यं साक्षात्संबंधाभावेन जातिमत्त्व-
।६३। व्यपदेशाभावात् तस्माज्जातिसंबंधात्तत्प्रत्यासत्तिरधिकरणत्वं सामान्यादि- ।६३।
ष्वस्तीति तेषामप्यधिकरणत्वं न स्याद् न्यते यद्वा संयोगसंयोगसमवायसं-
बंधाभ्यामेवाधारत्वमधिकरणमधिकरणत्वमतः सामान्यादौ तदौपचारि-
कमेवेति न कश्चिद्दोषः ॥ ७ ॥ ७ ॥ ॥ प्रत्यासत्तिप्रसंगेन बुद्धिस्थं विभुत्वं छ

थेबोधकत्वाद्वैशेषिकशास्त्रंग्रंथोपि वर्तिसमाप्तोग्रंथस्यैतच्छास्त्रमभिधीयतइ
तिशास्त्रत्वंहितच्छासनादिति येतेचनामधेयंकुर्वन्ग्रंथमाशास्तेसप्तेतिजंबु
प्लक्षकुशक्रौंचशाकशाल्मछीपुष्कराइतिसप्तद्वीपायस्यांसासातथाधरापृ
थिवीयावद्वर्त्ततेयावत्तुसप्तधरोधराःकुळपर्वताःमहेंद्रमळयादयःतावत्कौळ
मार्तंडार्कमितियावत्इयंसप्तपदार्थीवस्तुनीपदार्थानीप्रकाशिकास्तुइत्याशा
॥छ॥ सायांश्लोकः॥छ॥छ॥छ॥छ॥॥छ॥॥छ॥॥छ॥॥छ॥॥छ॥॥छ॥॥छ॥॥छ॥॥छ॥॥छ॥॥छ॥
॥छ॥॥गौरेश्वदेशेऽखिळराष्ट्रवर्यैः सदाकरोदक्षिणभूमिनिष्टः विराज ॥छ
तिसैह्यगिरींद्रसानौयत्रास्तिगोकर्णमहाबळेशः॥१॥तद्देशराजन्मायति

क्षयति सकलेति घटादावतिव्याप्तिवारणाय सकलेति संयोगो नायुतसिद्धिरतस्तां
लक्षयति ॥ विद्यमानयोरिति पृथग्विद्यमानयोः पदार्थयोः कुण्डबदरयोरिव संबं
धो युतसिद्धिरित्यर्थः तत्त्वतियोगित्वेनायुतसिद्धिं लक्षयति ॥ अविद्यमानयोरिति पृ
थगविद्यमानयोरित्यर्थः ॥ पृथक्पदभावे असंभवः स्यात्तदुक्तं अयुतसिद्धिर
पृथक्सिद्धिरिति आधारेत्यादि स्वरूपकथनेन शास्त्रासुबोधमित्युक्तं किं ततः
शास्त्रमित्यत आह ॥ साधनेति साधनस्य सुखदुःखाभावसाधनस्य श्रेयोभि
धायकं श्रेयसंबंधाभिधायकं शास्त्रमित्यर्थः ॥ तथाहि ज्योतिष्टोमेन स्वर्गका
मो यजेतेत्यादि यागस्य स्वर्गादिसंबंधो बोध्यते अतः साधनश्रेयोभिधायकं शा
स्त्रमित्यर्थः ॥ तथा चोक्तं प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा पुंसां येनोपदिश्येत तच्छा
द्व्यसत्ते जनभीष्टबोधकवचनस्य शास्त्रत्वं माभूदिति श्रेय इत्युक्तं वेदवाक्यातपाहिता

कै १

रिकदंडी सरस्वती मस्तकमाधवाख्यः सोऽयं शिवादित्यसुतेरका
र्षी टीकामिमां बाळसुखप्रवृत्त्यै ॥२॥ माधवाख्ययतींद्रेण गोदा
तीरनिवासिनां कृता सूत्रपदार्थस्फुटीकेयं मितभाषिणी ॥३॥ इति
श्रीमितभाषिणी संपूर्णा ॥ छ ॥॥ छ ॥ ७७ ॥ छ ॥ श्रीरस्तु ॥ छ ॥ छ ॥
श्री ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥
श्री छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥
ग्रथसंख्या ॥ १८०० । गंगार्पणमस्तु ॥ वीस्वेरार्पणमस्तु ॥ छ ॥ छ

K K S U LIBRARY
RAMTEK
441 106
M-894
Dist Nagpur

```
[OrderDescription]
,CREATED=16.10.20 16:04
,TRANSFERRED=2020/10/16 at 16:14:31
,PAGES=127
,TYPE=STD
,NAME=S0004061
,Book Name=M-894-SHAPTPDARSHA TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
```

```
FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
```

```
FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
```

```
FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
```

```
FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
```

```
FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
```

```
FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
```

```
FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
```

FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,